# ध्यानाङ्गोपनिषद्



# एगो आया

सर्वलब्धिनिधान पञ्चमगणधर
परमपूजनीयश्रीसुधर्मस्वामिभगवत्प्रणीत
स्थानाङ्गसूत्रसारसञ्चयरूपा

# स्थानाङ्गोपनिषद्

नवसर्जनम्–सम्पादनम्

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशक

श्री जिनशासन आराधना ट्रस्ट

णमोत्थु णं समणस्स भगवओ महावीरस्स
શ્રી પ્રેમ-ભુવનભાનુ-પદ્મ-જયઘોષસૂરિભ્યો નમઃ

**મૂળ સૂત્ર** : **શ્રી સ્થાનાંગસૂત્ર**
(તૃતીય આગમ, ગ્રંથાગ્ર ૩૭૦૦, ભાષા-અર્ધમાગધી)
**અર્થાગમ** : ચરમતીર્થપતિ કરુણાસાગર શ્રમણ ભગવાન શ્રી **મહાવીરસ્વામી**
**સૂત્રકાર** : પંચમગણધર સર્વલબ્ધિનિધાન શ્રી **સુધર્મસ્વામી** ભગવાન
**સારસંચય** : **શ્રી સ્થાનાંગોપનિષદ્**
**આલંબન** : મૂળ સૂત્ર અને અનેક ટીકાઓ
**સંચય-સંપાદન** : પ્રાચીનશ્રુતોદ્ધારક આચાર્ય શ્રી **હેમચંદ્રસૂરિ** શિષ્ય આચાર્ય શ્રી **કલ્યાણબોધિસૂરિ**
**સહયોગ** : મુનિરાજશ્રી ભાવપ્રેમ-તત્ત્વપ્રેમ-રાજપ્રેમવિજયજી મ.સા.
**પઠન પાઠનાધિકાર** : ગુર્વનુજ્ઞાત શ્રમણ ભગવંત

**પ્રકાશક** : શ્રી જિનશાસન આરાધના ટ્રસ્ટ
**મુદ્રક** : મલ્ટી ગ્રાફિક્સ www.multygraphics.com

સને 2013 • પ્રથમ આવૃત્તિ • વિ.સં.૨૦૬૯ • વી.સં.૨૫૩૯
પ્રતિ : 500 • ₹ 65/-

*No Copyright. • Reproduction Welcome.*

## ❀ પ્રાપ્તિસ્થાન ❀


### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ


18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com


---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




અનરાધાર અનુગ્રહ



अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

## ...મને ત્યાં **સ્થાન** આપી દે...

સ્થાનાંગસૂત્રનો આ સારસંચય
મૂળ સૂત્ર અને ટીકાના અધ્યયનનો
પ્રેરક બને... પદાર્થધારણામાં
ઉપયોગી બને... અને પરમ
સ્થાનની પ્રાપ્તિ કરાવે,
એ જ શુભેચ્છા.

– આ. કલ્યાણબોધિસૂરિ

# विषयानुक्रमः


| क्रमः | अध्ययनम् | पृष्ठम् |
|---|---|---|
| १. | एकस्थानकम् | 1 |
| २. | द्विस्थानकम् | 3 |
| ३. | त्रिस्थानकम् | 16 |
| ४. | चतुःस्थानकम् | 38 |
| ५. | पञ्चस्थानकम् | 70 |
| ६. | षट्स्थानकम् | 86 |
| ७. | सप्तस्थानकम् | 92 |
| ८. | अष्टस्थानकम् | 101 |
| ९. | नवस्थानकम् | 107 |
| १०. | दशस्थानकम् | 111 |

# अथ
# स्थानाङ्गोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं,
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं प्रचिनोमि रम्यं,
स्थानाङ्गसारं हि सुधावतारम्।।

# एकस्थानकम्

इह हि परमकारुणिकः श्रीसुधर्म-स्वामी श्रीजम्बूस्वामिनमाहजिनान्तिके श्रुतं मया-"एक आत्मा। एक दण्डः। एका क्रिया। एवं लोक-अलोक-धर्म-अधर्म-बन्ध-मोक्ष-पुण्य-पाप-आश्रव-संवर-वेदना-निर्जरा-

विकुर्वणा–मनो–वचः–कायप्रवृत्ति–उत्पादादीनामपि भावनी–यमेकत्वम्। समय–प्रदेश–परमाणु–सिद्धि–सिद्ध–परिनिर्वाण–परिनि–र्वृतीनां शब्दादीनां च। एकः प्राणातिपातो यावदेकः परि–ग्रहः। एकः क्रोधो यावल्लोभः। एवं यावदेकं मिथ्यात्वशल्यम्।

द्रष्टव्यमेवमवसर्पिण्यादेः सुषमसुषमादे–श्चैकत्वम्। नैरयिकादेर्वर्गणानां च। एको जम्बूद्वीपः। एकः श्रमणभगवान् महावीरः सिद्धः। एकहस्तोच्चा अनुत्तरसुराः।

आर्द्रादिनक्षत्राण्येकताराणि। एकप्रदे-
शावगाढाः पुद्गला अनन्ताः। एक-
समयस्थितिकाश्च। एकगुणकालकादयश्च।

# द्विस्थानकम्

॥२-१॥

यदस्ति लोके तद् द्विपदावतारम्। तद्य-
थाजीवाश्चैवाजीवाश्चैव। अत्रैवकारेण
राश्यन्तरापोहः। एवं त्रसस्थावराः सयो-
निकायोनिकाः सायुषनायुषः सेन्द्रिया-
निन्द्रियाः सवेदकावेदकाः सरूप्यरू-

पिणः सपुद्ग-लापुद्गलाः संसार्य-संसारिणश्चापि द्रष्टव्याः।

तथाऽऽकाशानाकाशा धर्माधर्मा बन्ध-मोक्षौ पुण्यपापावित्यादेरप्यालोकनीयं द्वित्वम्। द्विविधा क्रिया-जीवक्रियाऽजीवक्रिया च। द्विविधा जीवक्रिया-सम्यक्क्रिया मिथ्याक्रिया च। द्विविधाऽजीवक्रिया इर्यापथिका साम्परायिका च। कायिकाऽधिकरणिकादीनामपि ज्ञातव्यं द्वित्वम्।

द्विविधा गर्हा-मनसा वचसा च। यद्वा

दीर्घा ह्रस्वा च। द्विविधं प्रत्याख्यानम्-मनसावचसाच।यद्वादीर्घंह्रस्वंच।द्वाभ्यां मोक्षः-विद्यया चरणेन च। द्वावपरिज्ञाय धर्मश्रुत्यलाभः, अबोधः, प्रव्रज्या-विरहः, अब्रह्म, असंयमः, असंवरः, मत्यादिज्ञानविरहश्च, तद्यथाआरम्भः परिग्रहश्च। एवं एतद्द्वयपरिज्ञया श्रवणादिलाभोऽप्यूह्यः। द्वाभ्यां धर्मश्रवणलाभः-श्रुत्वाऽधिगम्य च। एवमेव मत्यादिज्ञानलाभं यावद् द्रष्टव्यम्।

समाद्वयम्–उत्सर्पिण्यवसर्पिणी च। उन्मादद्वयम्–यक्षावेशो मोहोदयजः। दण्डद्वयम्–अर्थदण्डोऽनर्थदण्डश्च। दर्शनद्वयम्–सम्यग्दर्शनं मिथ्यादर्शनं च। ज्ञानद्वयंप्रत्यक्षं परोक्षं च। धर्मद्वयम्–श्रुतधर्मश्चारित्रधर्मश्च। एवमूह्यं श्रुतादि–धर्मद्वैविध्यमपि। द्विविधाः पृथ्वी–कायिकाः सूक्ष्मा बादराश्च। अन्य–थापि–पर्याप्तकापर्याप्ताकादिना तेषा–मप्कायादेश्च भाव्यं द्वैविध्यम्। आका–शद्वयम् लोकाकाशोऽलोकाकाशश्च।

नैरयिकशरीरद्वयम्–अभ्यन्तरं कार्मणम्, बाह्यं च वैक्रियम्। एवमन्येषामपि यथायोगं भाव्यम्। विग्रहगत्यापन्ननैरयिकाणां शरीरद्वयम्–तैजसं कार्मणं च। एवमन्येषामपि। द्वाभ्यां कारणाभ्यां नैरयिकशरीरोत्पत्तिः–रागेण द्वेषेण च। एवमन्येषामपि। कायद्वयम्त्रसकायाः स्थावरका–याश्च। प्रव्राजन–मुण्डन–शिक्षा–उपस्थापनादौ सर्वत्र दिग्द्वयं कल्प्यम्–पूर्वोत्तरा च।

## ॥२-२॥

देवादयः स्वकृतकर्मवेदनमिहलोके पर-लोके च कुर्वते। नैरयिकाणां मनुष्ये-भ्यः पञ्चेन्द्रियतिर्यग्भ्यश्चागतिः गति-रपि एतेष्वेव। एवमन्येषामपि यथायो-गमूह्यम्। द्रष्टव्यं भव्याभव्यादेरपि नैर-यिकादिद्वैविध्यम्। अधःप्रभृतिलोक-दर्शनहेतुद्वयम्-वैक्रियसमुद्घातगतात्मा, तदगतात्मा च। शब्दश्रवणप्रकारद्वयम्-देशतः सर्वतश्च। एवं रूपादावपि द्रष्टव्यम्, अवभासन-विकुर्वणादौ च।

॥२-३॥

शब्दद्वयम्–भाषाशब्दो नोभाषाशब्दश्च। द्विविधो भाषाशब्दः–अक्षरसम्बद्ध इतरश्च। द्विविधोऽभाषाशब्दः–आतोद्यशब्दोऽनातोद्यशब्दश्च। द्विविध आतोद्यशब्दः–ततो विततश्च। द्विविधस्ततः–घनः शुषिरश्च। एवं विततोऽपि। शब्दोत्पादकारणद्वयम्–पुद्गलसङ्घातस्तद्भदश्च। सङ्घातादिहेतुद्वयम्–स्वभावः पुरुषादिर्वा। भावनीयानि पुद्गलानां भिन्नाभिन्नादिद्वैविध्या–न्यपि।

प्रतिमाद्वयम्–समाधिप्रतिमोपधान–प्रतिमा च। यद्वा विवेकप्रतिमा व्युत्सर्गप्रतिमा च। यद्वा भद्रा सुभद्रा च। यद्वा महाभद्रा सर्वतोभद्रा च। यद्वा क्षुल्लमोकप्रतिमा महन्मोकप्रतिमा च। यद्वा यवमध्यचन्द्रप्रतिमा वज्रमध्य–चन्द्रप्रतिमा च। सामायिकद्वयम् अगारसामायिकमितरं च। कर्मद्वयम्–प्रदेशकर्मानुभावकर्म च। क्षेत्रद्वयं समम्–भरत एरवतश्च। एवमन्ययोरपि क्षेत्रयोर्नगयोर्कूटप्रभृत्योश्चोह्यं समत्वम्। समं द्रुमद्वयम्–कूटश्यामलि जम्बूश्च।

तत्रस्थदेवद्वयम्-गरूडोऽनादृतश्च।

सुषमदुषमारसमयो द्विसागरोपमकोटाकोटिमितः। सुषमायां मनुजोच्चत्वं गव्यूतद्वयम्। परमायुश्च पल्योपमद्वयम्। भरतैरवतयोरेकसमयेर्हद्द्वयोत्पत्तिः।, एवं चक्रवर्त्यादेरपि। देवकुरूत्तरकुर्वोः सदापि सुषमसुषमा। हरिवर्षरम्यग्वर्षयोः सदा सुषमा। हैमवतैरण्यवतयोः सदा सुषमदुःषमा। पूर्वापरविदेहयोः सदा दुःषमसुषमा। भरतैरवतयोश्च षड्विधकालानुभावः।

कालत्रयेऽपि जम्बूद्वीपे चन्द्रद्वयम्, एवं सूर्यद्वयं कृत्तिकादिनक्षत्रद्वयमप्यूह्यम्। द्वयं तद्देवतानां ग्रहाणां च। जम्बूद्वीपलवणसमुद्रयोर्वेदिका प्रत्येकं द्विगव्यूतोच्चा। असुरकुमारेन्द्रद्वयम्-चमरो बलिश्च। एवं नागादिष्वपि धरणादिभावना। एवं यावदच्युतं भावनीयं यथागमम्। महाशुक्रसहस्त्रारयोर्विमाना द्विवर्णाः-पीताः शुक्लाश्च। ग्रैवेयकदेवानामुच्चत्वं हस्तद्वयम्।

## ॥२-४॥

समयादारभ्यावसर्पिणीं यावत् कालो जीवाजीवात्मकः। एवं ग्रामादेः पर्वता-देश्च जीवाजीवात्मकतोह्या। आत्मा प्रकारद्वयेन शरीरस्य स्पर्शादि कृत्वा निर्याति-देशेन सर्वेण च। क्षयेनो-पशमेन च धर्मश्रवणादीनां मनःपर्य-वोत्पादपर्यवसानानां लाभः।

द्विविधं कालौपमिकम्-पल्योपमं सागरोपमञ्च। क्रोधादिद्वैविध्यमात्म परप्रतिष्ठिततया भाव्यम्। मरणद्वयं

निषिद्धम्–वलन्मरणं वशार्त्तमरणं च। एवं निदानमरणं तद्भवमरणं च गिरिपतनं तरुपतनं च। जल-प्रवेशो ज्वलनप्रवेशश्च। विषभक्षणं शस्त्रोत्पाटनं च। मरणद्वयं नित्यमननु-ज्ञातमपि कारणेऽप्रतिक्रुष्टम्–वैहानसं गृद्धपृष्ठं च। अनुज्ञातं तु मरणद्वयम्-पादपोपगमनं भक्तप्रत्याख्यानं च। तयोरपि द्वैविध्यम्निर्हारिममनिर्हारिमं च। जीवा अजीवाश्च लोकः। बोधि-द्वैविध्यम्ज्ञानबोधिदर्शनबोधिश्च।

मूर्च्छाद्वयम्-प्रेमप्रत्यया द्वेषप्रत्यया च। आद्यद्वयम्-माया लोभश्च। अपरद्वयम्-क्रोधो मानश्च। आराधनाद्वयम्-धार्मिकाराधना केवल्याराधना च। आद्या द्विविधा-श्रुतधर्माराधना चरित्रधर्माराधना च। अपरा द्विविधा-अन्तक्रिया कल्पविमानोपपत्तिका च (श्रुतकेवल्यादेः)।

सत्यप्रवादपूर्वे द्वेवस्तुनी। पूर्वभाद्रपदादीनां नक्षत्राणां द्वे तारे। चक्रिद्वयमप्रतिष्ठाने गतम्-सुभूमो ब्रह्मदत्तश्च।

# त्रिस्थानकम्

॥३-१॥

इन्द्रत्रयम्–ज्ञानेन्द्रो दर्शनेन्द्रश्चारित्रेन्द्रश्च। यद्वा देवेन्द्रोऽसुरेन्द्रो मनुष्येन्द्रश्च। त्रिविधा विकुर्वणा–बाह्यपुद्गलान् गृहीत्वाऽगृहीत्वोभयतश्च। प्रकारत्रयेणाल्पायुर्बन्धः–प्राणातिपातेन मृषावादेन श्रमणस्याप्रासुकानैषणीयाशना–दिदानेन। इतरत्रयेण दीर्घायुर्बन्धोऽपि द्रष्टव्यः।

त्रिधाऽशुभदीर्घायुर्बन्धः–प्राणातिपातेन मृषावादेन श्रमणहीलनादिना च।

इतरश्चेतरत्रयेण। दण्डत्रयं गुप्तित्रयं च सुगमम्। मनोवाक्कायैर्गर्हाया: प्रत्याख्यानस्य च त्रैविध्यं भावनीयम्। वृक्षत्रयम्–पत्रोपेत: पुष्पोपेत: फलोपेत:। तत्सदृशपुरुषत्रयमपि। यद्वा वेदचिह्नाभिलापै: पुरुषत्रयम्। उत्तमादिभिर्वा। धर्मभोगकर्मभिरुत्तमत्रयम्। धर्मपुरुषा अर्हन्त:। भोगपुरुषाश्चक्रिण:। कर्मपुरुषा वासु–देवा:। मध्यमत्रयं उग्रभोगराजन्यै:। जघन्यत्रयम्–दासभृतकभागधरै:।

मत्स्यत्रैविध्यमण्डजपोतजसम्मुर्च्छिमैः। स्त्र्यादिभिस्तत्प्रत्येकत्रयं च। एवं पक्षि-उरःपरिसर्प्पभुजपरिसर्प्पा-णामप्यूह्यम्। स्त्रीत्रैविध्यं तिर्यङ्मनुष्यदेवस्त्रीभिः। आद्यत्रयं जलस्थलखेचरीभिः। द्विती-यत्रयं कर्माकर्मन्तर्द्वीपगाभि।ः एवं पुरुषत्रै-विध्यमपि। नपुंसकेषु देवस्थाने नारकाभिलापः।

नैरयिकलेश्यात्रयम्-कृष्णनीलकापो-तलेश्याः। सङ्क्लिष्टलेश्यात्रयमसुरकु-मारादेरिदमेव। इतरत्तु तेजःपद्मशुक्लरूपं

यथायोगं भावनीयम्।

तारकचलनहेतुत्रयम्–विकुर्वणा प्रवीचारः सङ्क्रमणम्। विद्युत्कारकरणे देवस्य हेतुत्रयम्–विकुर्वणा प्रवीचारः श्रमणर्द्ध्यादिरूपदर्शनम्। एवं स्तनितशब्दकरणहेतुत्रयमपि।

लोकान्धकारहेतुत्रयम्–अर्हद्व्युच्छेदस्तदुक्तधर्मोच्छेदः पूर्वगतोच्छे–दश्च। एवं देवान्धकारहेतुत्रयमधपि। लोकोद्योतहेतुत्रयम्–अर्हज्जन्म तद्दीक्षा तज्ज्ञानोत्पादमहिमा च। एवं देवोद्योतहेतु–

त्रिकमपि। एवमेव देवसन्निपाताद्यपि।

त्रयाणां दुष्प्रतिकारम्–मातापित्रोः स्वामिनो धर्माचार्यस्य च। त्रिस्थान–सम्पन्नोऽनगारो व्यतिव्रजेत् संसारम्, तद्यथा–अनिदानो दृष्टिसम्पन्नो योग–वाहकश्च। अच्छिन्नपुद्गलचल–नहेतु–त्रयम्–आहार्यमाणः विकुर्व्यमाणः सङ्क्रम्यमाणश्च। उपधित्रयम्–कर्मोपधिःशरीरोपधिर्बाह्यभाण्डमात्रोपधिश्च। एवं परिग्रहत्रयमपि। यद्वा सचित्ताचि–त्तमिश्रैस्तत्त्रयम्। प्रणिधानत्रयम्–मनो–

वाक्कायसत्कम्। एवं सुप्रणिधानाद्यपि। योनित्रयम्-शीतोष्णमिश्रत्वयोगात्। यद्वा सचित्तेतरमिश्रत्वोपेतत्वात्। यद्वा संवृतेतरमिश्रभावात्। यद्वा कूर्मोन्नत-शङ्खावर्त्तवंशीपत्रभेदैः।

भरतवर्षादौ तीर्थत्रयम्-मागधो वर-दामः प्रभासश्च। सुषमसुषमाकालः सागरोपमकोटाकोटित्रयम्। एवमायु-राद्यपि त्रिपल्योपमेत्यादि द्रष्टव्यम्। याणां मध्यमायुर्पालनम्-अर्हतां चक्रिणां बलदेववासुदेवानां च, तेषां वृद्धत्वाभावात्।

बादरतेजस्कायोत्कृष्टस्थितिः–रात्रि-दिवसत्रयम्। बादरवायुकायोत्कृष्टस्थितिः–वर्षसहस्त्रत्रयम्। शाल्यादीनां योनिविच्छेदो जघन्येनान्तर्मुहूर्त्तादुत्कृष्टेन वर्षत्रयात्। शर्करा–प्रभायामुत्कृष्टा वालुकाप्रभायां च जघन्या स्थितिः सागरोपमत्रयम्। पञ्चम्यां त्रिलक्षनरकावासाः। आद्यत्रिनरकेषूष्णवेदना।

समं त्रितयम्–जम्बूद्वीपोऽप्रतिष्ठान-नरकः सर्वार्थसिद्धमहाविमानश्च। इतर-दपि–सीमन्तकनरकः सिद्धशिला

समयक्षेत्रं च। उदकरसं समुद्रत्रयम्-
कालोदः पुष्करोदः स्वयम्भूरमणश्च।
बहुमत्स्याद्याकीर्णाब्धित्रयम् लवणः
कालोदः स्वयम्भूरमणश्च।

निःशीलत्वादिकलङ्कितं लोकत्रयम-
प्रतिष्ठानगामि-चक्रिवासुदेवा राजानो
महारम्भाश्च कुटुम्बिनः। सुशीलत्वाद्य-
लङ्कृतं लोकत्रयं सर्वार्थसिद्धगामि-
सर्वविरता राजानः सेनापतयो लेखा-
चार्यादयश्च। ब्रह्मलोकलान्तकयोस्त्रि-
वर्णा विमानाः-कृष्णा नीला लोहिताश्च।

आनतादिषु देहोच्छ्रयः–हस्तत्रयम्।

॥३-२॥

लोकत्रयम्–ज्ञानादिभिः। उर्ध्वादिभिर्वा। चमरेन्द्रपर्षत्त्रयम्–समिताऽऽभ्यन्तरा, चण्डा मध्यमा, जाता बाह्या। एवमन्येषामपीन्द्रादीनां यथायोगं द्रष्टव्यम्। बोधित्रयं बुद्धत्रयं च ज्ञानादिभिः। प्रव्रज्यात्रयम्–इहपरोभयलोकप्रतिबद्धतया। पुरतो मार्गत उभयतः प्रतिबद्धत्वाद्वा। तत्रपुरतःशिष्याद्याशंसनान्मार्गतः स्वजनादिस्नेहाच्छेदात्। यद्वा प्रव्रज्या–

त्रयम्–व्यथामुत्पाद्य, अन्यत्र नीत्वा, सम्भाष्य च। यद्वाऽवपातप्रव्रज्या सदगुरुसेवातः, आख्यातप्रव्रज्या प्रव्रजेत्यभिहितस्य, सङ्गारप्रव्रज्या सङ्केततः।

निर्ग्रन्थत्रयं नोसञ्ज्ञोपयुक्तम्–पुलाको निर्ग्रन्थः स्नातकश्च। निर्ग्रन्थत्रयं सञ्ज्ञा–नोसञ्ज्ञोपयुक्तम्–बकुशः प्रतिसेवना–कुशीलः कषायकुशीलश्च। शैक्षभूमि–त्रयम् उत्कृष्टा षणमासा, मध्यमा चतुर्मासा, जघन्या सप्त–रात्रिदिवसा। स्थविरत्रयम्–जातिसूत्रपर्यायैः।

पुरुषत्रयम्–रक्तद्विष्टमध्यस्थैः। निःशी–लत्वादिकलङ्कितस्य गर्हितत्र यम्–इदं जन्म, उपपातः, आजातिश्च। इतरस्यैतत्त्रयमेव प्रशस्तम्। सर्वजीव–त्रैविध्यम्–सम्यङ्मिथ्यामिश्रदृष्टिभिः। लोकस्थितित्रैविध्यम्। आकाशप्रति–ष्ठितो वातः, वातप्रति–ष्ठित उदधिः, उदधिप्रतिष्ठिता च पृथ्वी। त्रिभिर्दिग्भिः गत्यादिप्रवर्त्तनम् ऊर्ध्वाधस्तिर्यग्भिः।

त्रसत्रैविध्यम्–तेजोवायुत्रसैः। स्थाव–रत्रैविध्यम्–पृथ्व्यप्वनस्पतिभिः। अभे–

द्यादित्रयम्–समयः प्रदेशः परमाणुश्च। दुःखभयाः प्राणिनः। जीवेन कृतं दुःखं प्रमादेन। तदपगमोऽप्रमादेन।

॥३-३॥

मायिनोऽनालोचनादिहेतुत्रयम्–अकार्षमहम्, करोम्यहम्, करिष्येऽहं निन्द्यमिति। यद्वाऽकीर्त्त्यवर्णाविनयभयैः। मायिन आलोचनादिहेतुत्रयम्–मायिन इहलोकोपपातायतिगर्हितत्वदर्शनैः। यद्वाऽमायिनस्तत्प्रशस्तत्वदर्शनैः। यद्वा ज्ञानाद्यर्थम्।

पुरुषत्रयम्–सूत्रार्थोभयधरैः। कल्प्यव–स्त्रत्रयम्–और्णिकादि, अतसीमयम्, कार्पासिकं च। कल्प्यपात्रत्रयम्–तुम्बकम्, काष्टमयम्, मृन्मयम्। वस्त्र–धारणकारणत्रयम् लज्जाजुगुप्सापरीष–हप्रत्ययैः। वचनत्रयम्–तद्वचनं तदन्य–वचनं नोऽवचनम्। एवं मनस्त्र–यमपि।

अल्पवृष्टिहेतुत्रयम्–अबहूदकजीवोप–पातः, सम्यगनाराधितदेवादिकृतमन्यत्र जलधरसंहरणम्, वायुना जलधर–विधूननं च। एतद्वैपरीत्येन महावृष्टि–हेतुत्रयमप्यूह्यम्।

मनुष्यलोके देवानागमस्य हेतुत्रयम्-
दिव्यकाम-गृद्धिः, दिव्यप्रेमसङ्क्रान्तिः
दिव्यकामभोग-मूर्च्छाप्रयुक्तविलम्ब-
कालेऽल्पायुस्तया स्वजनमृत्युः। तदा-
गमनहेतुत्रयम्-स्वधर्माचार्यकृतज्ञतया,
ज्ञानादिसम्पन्नवन्दनार्थम्, स्वजनमिल-
नार्थम्। देवप्रीतिहेतुत्रयम्-मनुष्यभवा-
र्यक्षेत्रसुकुलजन्मभिः। देवपरितापहेतु-
त्रयम्-बहुश्रुतानध्ययनम्, दीर्घश्राम-
ण्यपर्यायाननुपालनम्, विशुद्धचारित्रा-
स्पर्शनम्। च्यवनज्ञानहेतुत्रयम्-विमा-
नादिप्रभापगमदर्शनम्, कल्पवृक्षम्ला-

न्यवलोकनम्, स्वतेजोलेश्याहानिज्ञा-नम्। देवोद्वेगहेतुत्रयम्-च्यवनचिन्ता, अनन्तरभवामेध्यभक्षणविचारः, गर्भ-वासविमर्शश्च। विमानसंस्थानत्रयम्-वृत्तास्त्र्यंशाश्चतुरंशाः। त्रिप्रतिष्ठितानि विमानानि-घनोदधि-घनवाताऽव-काशान्तरप्रतिष्ठितत्वात्। त्रिविधानि विमानानि-अवस्थितानि विकुर्वितानि परियानिकानि।

अवमौदर्यत्रयम्-उपकरण-भक्तापान-भावावमौदर्यैः। निग्रन्थाहितहेतुस्थान-त्रयम्-आर्त्तस्वरकरणम्,शय्यादिनिन्दा,

अपध्यानम्। हितहेतुत्रयमतोऽपरथा नेयम्। तेजोलेश्याप्तिहेतुत्रयम्–आतापना–क्षमा–ऽपानकतपोभिः। एकरात्रिकभिक्षुप्रतिमासम्यगनिर्वाहफलम्–उन्मादो दीर्घकालीनरोगातङ्कः केवल्युक्तधर्मभ्रंशश्च। तन्निर्वाहफलम्–अवधि–मनःपर्यव–केवलज्ञानोत्पादरूपम्। त्रिविधं दर्शनम्–सम्यङ्मिथ्यामिश्रैः। एवं रुचिः प्रयोगश्च। पुद्गलत्रयम्–प्रयोग–विस्त्रसा–मिश्र–परिणतत्वात्। त्रिप्रतिष्ठिता नरकाः–नैगमसङ्ग्रहव्यवहाराणां पृथ्वीप्रतिष्ठिता

ऋजुसूत्रस्याकाशप्रतिष्ठिताः त्रयाणां शब्दनयानामात्मप्रतिष्ठिताः।

धर्मत्रयम्–श्रुतचारित्रास्तिकायैः। उपक्रमत्रयम्–धर्माधर्ममिश्रैः। यद्वात्मपरोभयैः। एवं वैयावृत्त्यानुग्रहानुशास्त्युपालम्भा अपि। कथात्रयम्–धर्मार्थकामैः। एवं विनिश्चयत्रयमपि।

श्रमणोपासनफलं धर्मश्रवणम्, तत्फलं ज्ञानम्, तत्फलं विज्ञानम्। एवं प्रत्याख्यानसंयमानाश्रवतपोनिर्जराऽक्रियानिर्वाणानामपि पूर्वपूर्वफलत्वम्।

## ॥३-४॥

प्रतिमाप्रतिपन्नप्रतिश्रयत्रयम्-सभा-प्रपातः, अनावृतगृहम्, वृक्षमूलम्। तत्संस्तारकत्रयम्-पृथ्वीशिला, काष्ठ-शीला, यथासंस्तृतं च। कालत्रयम्-अतीतवर्त्तमानानागतैः। एवमावलि-कादि पुद्गलपरावर्त्तान्तं सर्वमपि।

प्रज्ञापनात्रयम्-ज्ञानादिभिः। एवं सम्य-क्त्रयम्। आराधनासङ्क्लेशासङ्क्ले-शातिक्रमव्यतिक्रमातिचारानाचाराणां चापि त्रयमेवम्। पृथ्व्या देशचलने हेतुत्रयम्-बादरपुद्गलनिपातः, मह-

र्द्धिकदेवोन्मज्जनादि, नागसुपर्णयोः सङ्ग्रामश्च। सर्वचलनहेतुत्रयम्-घन-वातक्षोभः, श्रमणर्द्ध्युपघदर्शनहेतुक महर्द्धिकदेवकृतचालनम्, देवासुरयोः सङ्ग्रामश्च।

अवाचनीयत्रयम्-अविनीतो विकृति-प्रतिबद्धोऽनुपशान्तक्रोधः। दुःसञ्ज्ञाप्यत्रयम्-दुष्टमूढव्युद्ग्राहितैः। सुसञ्ज्ञाप्यत्रयं वैपरीत्यात्। मण्डलिक-पर्वतत्रयम्-मानुषोत्तरः कुण्डलवरो रुचकवरश्च।

गुरुप्रत्यनीकत्रयम्–आचार्योपाध्याय-स्थविरप्रत्यनीकैः। समूहप्रत्यनीकत्रयम्–कुलगणसङ्घप्रत्यनीकैः। अनुकम्पामाश्रित्य प्रत्यनीकत्रयम्–तपस्विग्लानशैक्षप्रत्यनीकैः। भावं प्रतीत्य ज्ञानादिप्रत्यनीकैः। श्रुतं प्रतीत्य-सूत्रार्थोभयप्रत्यनीकैः।

पित्रङ्गत्रयम्–अस्थि, अस्थिमध्यरसः, केशश्मश्रुरोमनखाश्च। मात्रङ्गत्रयम्–मांसं रक्तं मेदफिप्फिसादि च।

महानिर्जराहेतुत्रयम्–बहुश्रुताध्ययना-

भिलाषः।, एकाकिविहारप्रतिमोपस-म्पन्मनोरथः, सविधिपादपोपगमनानशनस्वीकारवाञ्छा च। श्रावकं प्रतीत्य-परिग्रहत्यागेच्छा, प्रव्रज्यामनोरथः, सविधिपादपोपगमनप्रतिपत्त्यभिला-षश्च। चक्षुस्त्रयम्-एकद्वित्रिभिः। छद्मस्थ एकचक्षुः। देवो द्विचक्षुः। साव-धिमुनिस्त्रिचक्षुः। उत्पन्नावधिः प्रागुर्ध्वं ततस्तिर्यञ्चं ततोऽधस्तनं पश्यति लोकम्, दुरभिगमत्वादधोलोकस्य।

भगवदुक्तधर्मत्रयम्-स्वधीतं सुध्यातं सुतपस्यितम्। यदा स्वधीतं भवति तदा

सुध्यातं भवति। यदा च सुध्यातं भवति, तदा सुतपस्यितं भवति।

हिंसादेर्व्यावृत्तित्रयम्–ज्ञस्याज्ञस्य संशयिनश्च। एवमभिष्वङ्ग आसेवा च। जिनत्रयम्–अवधिमनःपर्यवकेवलज्ञानजिनैः। केवलित्रयमप्येवम्। अर्हत्त्रयं च। मरणत्रयम्–बालपण्डितमिश्रमरणैः।

प्रत्येकपृथ्व्याः समन्ताद्वलयत्रयम्–घनोदधि–घनवात–तनुवातलक्षणम्। अभित्यादिनक्षत्राणि त्रितारकाणि। जिनत्रिक चक्रवर्तीशान्तिनाथादि।

# चतुःस्थानकम्

## ॥४-१॥

अन्तक्रियाचतुष्कम्–अल्पकर्मणो दीर्घपर्यायेण, भरतचक्रिवत्। महाकर्मणोऽल्पपर्यायेण, गजसुकुमालवत्। महाकर्मणो दीर्घपर्यायेण, सनत्क्चक्रिवत्, अल्पकर्मणोऽल्पपर्यायेण, मरुदेवावत्। वृक्षचतुष्कम्–उन्नतोन्नतः, उन्नतप्रणतः, प्रणतोन्नतः, प्रणतप्रणतः। उच्चत्वापेक्षया जात्याद्यपेक्षया च। यद्वा प्राक्तन-पर्यायापेक्षया पाश्चात्यपर्यायापेक्षया च।

एवं पुरुषचतुष्कमापि। एवमुन्नोतोन्नतरुप इत्याद्यप्यूह्यम्। ऋजुवक्र इत्यादि च।

प्रतिमाप्रतिपन्नकल्प्यभाषाचतुष्कम् याचनी प्रच्छनी अनुज्ञापनी पृष्टव्याकरणी च। वस्त्रचतुष्कम्-शुद्धशुद्ध इत्यादि। एवं पुरुषचतुष्कमपि। सुतचतुष्कम्-अतिजातः, अनुजातः, अपजातः, कुलाङ्गारश्च। पुरुषचतुष्कम्-सत्य-सत्य इत्यादि।

मुकुलचतुष्कम्-आम्रतालवल्लीमेषवि-षाणसत्कमुकुलैः। आम्रमुकुलसमानः

पुरुषः सेव्यमान उचितकाल उचित-फलदो भवति। अतिचिरेण सेवकस्य कष्टेन महदुपकारफलदस्ताल-मुकु-लोपमः। अक्लेशेनाचिरेण फलदो वल्ली-मुकुलोपमः। सेव्यमानोऽपि शोभनवचनान्येव ब्रुवाणोऽनुपकारको मेषविषाणमुकुलोपमः, तन्मुकुलस्य सुवर्णवर्णत्वादखाद्यफलदायकत्वाच्च।

घुणचतुष्कम्-त्वक्छल्लीकाष्ठसारखा-दत्वेन। एवं भिक्षुचतुष्कमपि। त्वक्क-ल्पासाराभ्यवहर्त्तु-र्निरभिष्वङ्गत्वात् कर्मभेदमङ्गीकृत्य वज्रसारं तपो भवति,

अतस्तत्तपः सारखादसमानः। एवमग्रेऽ-प्यूह्यम्। बादरवनस्पतिकायचतुष्कम्-अग्रमूलपर्वस्कन्धबीजैः।

मनुष्यलोके नारकानागमहेतवः-समु-द्भूतवेदना, नरकपालाधिष्ठानम्, नरक-वेद्याशुभनामकर्माद्यक्षयः, नरकायुः सत्ता च। आर्त्तादि ध्यानचतुष्कम्। तत्प्रत्येकलक्षणाद्यप्यूह्यं यथागमम्।

देवस्थितिचतुष्कम्-देवः, देवस्नातकः (मुख्यः), देवपुरोहितः (शान्तिकर्मकृत्), देवप्रज्वलनः (मागधोपमः)। कषाय-

चतुष्कम्–क्रोधादि। क्रोधप्रतिष्ठा–आत्मपरोभयप्रतिष्ठिताप्रतिष्ठितैः। एवं मानादिप्रतिष्ठापि। क्रोधोदयहेतुचतुष्कम्–क्षेत्रवस्तुशरीरोपधिलक्षणम्। क्रोधचतुष्कम्–अनन्तानुबन्ध्यादि। यद्वाऽऽभोगानाभोगनिर्वर्त्तितोपशान्तानुपशान्तरूपं क्रोधचतुष्कम्। एवं मानाद्यपि।

प्रतिमाचतुष्कम्–समाधितपाविवेकव्युत्सर्गैः। समाधिप्रतिमा–श्रुतचारित्रगोचराभिग्रहः। विवेकः–अशुद्धातिरिक्ताहारादित्यागः। अजीवकाय–

भूतास्तिकायाः–धर्माधर्माकाशपुद्ग–कास्तिकायाः। सत्यचतुष्कम्–काय–भाषाभावर्जुकताऽविसंवादनयोगश्च। असत्यचतुष्टयमेतद्वैपरीत्यात्। प्रणिधा–नचतुष्कम्–मनोवाक्कायोपकरणप्रणि–धानैः। एवं सुप्रणिधान–दुष्प्रणिधान–योरपि चतुष्कम्।

पुरुषचतुष्टयम्–आपातभद्रको न संवा–सभद्रक इत्यादिचतुर्भङ्गी। आत्मपाप–दर्शी न परस्येत्यादि। वन्दति न वन्दाप–यतीत्यादि। एवं सत्कारादावपि द्रष्टव्यम्।

चमरेन्द्रस्य लोकपालचतुष्टयम्–सोम–यमवरुणवैश्रमणरूपम्। एवमन्येषामपि यथायोगम्। देवचतुष्कं भवनपत्यादि। प्रमाणचतुष्कं द्रव्यादि। संसारचतुष्कं द्रव्यादि। चतुर्विधो दृष्टिवादः–परिकर्म सूत्राणि, पूर्वगतः, अनुयोगश्च। चतुर्विधः पुद्गलपरिणामः वर्णगन्धरसस्पर्शैः। द्वाविंशत्यर्हन्तश्चातुर्यामं धर्मं प्ररूपयन्ति (आद्यन्तिमवर्जाः) भरतैरवतयोः। सर्वेऽपि विदेहस्था जिनाश्च।

हास्योत्पत्तिः–दृष्ट्वा भाषित्वा श्रुत्वा स्मृत्वा च। गोरसविकृतिचतुष्कम्क्षीर–

दधिसर्पिर्नवनीतानि। स्नेहविकृतयः–तैलघृतवसानवनीतानि। महाविकृतयः–मधुमांसमद्यनवनीतानि।

॥४-२॥

प्रतिसंलीनचतुष्कम्–क्रोधादिभिः। एवमितरदपि। यद्वा मनोवाक्कायेन्द्रियैः। एवमप्रतिसंलीनचतुष्टयमपि। वृषभचतुष्कम्–जातिकुलरूपबलसम्पन्नत्वात्। एव पुरुषचतुष्टयमपि। एषामन्योऽन्यसंवेधोऽपि दृश्यः। हस्तिचतुष्कम्भद्रमन्दमृगसङ्कीर्णरूपम्। एवं पुरुष–

चतुष्कमपि। स्त्र्यादिविकथाचतुष्कम्। प्रभेदा अप्यासामूह्या यथागमम्।

केवलज्ञानप्रतिबन्धकचतुष्कम्–अभीक्ष्णं विकथा, विवेकव्युत्सर्गाभ्यामात्मनः सम्यगभावनम्, पूर्वरात्रापररात्रसमये धर्मजागरिकाऽजागरणम्, प्रासुकैषणीयस्य सम्यगगवेषणा। एतद्वैपरीत्येन कैवल्योत्पादः।

चतुःप्रतिपदप्रत्ययिकमस्वाध्यायिकम्–आषाढाश्विकार्त्तिकचैत्रपौर्णमास्यः। सन्ध्याचतुष्कमस्वाध्यायिकम्–प्रथमा

पश्चिमा मध्याह्नमर्धरात्रम्। चतुष्कालं स्वाध्यायिकम्-पूर्वाह्णे, अपराह्णे, प्रदोषे, प्रत्यूषे।

पुरुषचतुष्कम्-आत्मान्तकरो (भवा-न्तकृत्) न परान्तकर इत्यादि। साधोः साध्व्यालापपुष्टालम्बनानि-मार्गपृच्छा, मार्गदेशनम्, अशना-दिदानम्, अशनादिदापनं च।

तमस्कायावृतकल्पाः-सौधर्मेशानस-नत्कुमारमाहेन्द्राः। वंशीमूलादिकल्प-मायादिचतुष्कं प्रसिद्धम्। द्रष्टव्यं च

नरकादिगतिहेतुत्वमप्यस्य। आहारचतुष्कमशनादि। यद्वोपस्करसम्पन्नः, अनुपस्करसम्पन्नः, स्वभावसम्पन्नः, पर्युषितसम्पन्नश्च। बन्धचतुष्कं प्रकृत्यादि। उपक्रमचतुष्कम्-बन्धनोदीरणोपशमनाविपरिणामनोपक्रमैः। प्रत्येकोऽप्येष प्रकृत्यादेश्चतुर्धा। एवमल्पबहुत्वमपि। सङ्क्रमाद्यपि च।

एकचतुष्कम्-द्रव्यभावपर्यायसङ्ग्रहैककैः। एवं कतिचतुष्कमपि। यथा कति द्रव्याणीति द्रव्यकति। सर्वचतुष्कम्-नामस्थापनाऽऽदेशनिरवशेष-

सर्वैः। जन्बूद्वीपे महाविदेहे जघन्यतोऽर्हच्चक्रिबलवासुदेवानां चतुष्कमुपपद्यते। मेरौ वनचतुष्कम्-भद्रशाल-नन्दन-सोमनस-पण्डकाभिधम्। अभिषेकशिलाः-पाण्डुकम्बलाऽतिपाण्डुकम्बला रक्तकम्बलाऽतिरक्तकम्बला च। जम्बूद्वीपद्वारचतुष्कम्-विजय-वैजयन्त-जयन्ताऽपराजित-नाम। लघुहिमवपर्वतविदिक्चतुष्के त्र्यादियोजनान्यतिक्रम्यान्तर्द्वीपचतुष्कान्यपि यथागमं ज्ञेयानि। लवणसमुद्रे सूर्यचन्द्रयोश्चतुष्कम्, कृत्तिकादेश्च।

द्वारचतुष्कमप्यस्य जम्बूवत्। नन्दीश्वरद्वीपे बहुमध्यभागेऽञ्जन-पर्वतचतुष्कम्। प्रत्येके तत्र सिद्धायतनचतुष्कम्। पुष्करिण्यादिचतुष्कं च।

सत्यचतुष्कम्-नामादि। आजीविकतपश्चतुष्कम्-उग्र-घोर-रसनिर्यूहनता-जिह्वेन्द्रियप्रतिसंलीनता (रागादित्यागः)। संयमचतुष्कम्-मनोवाक्कायोपकरणसंयमैः। उपकरणसंयमोऽकल्प्यवस्त्रादिपरिहारः। एवं त्यागोऽकिञ्चनताऽपि।

## ।।४-३।।

पर्वतरेखादिसमं क्रोधचतुष्कम्। भाव-चतुष्कम्-कर्दम-खञ्जन-वालुका-शैलोदकसमानम्। पक्षिचतुष्कम्-रूपसम्पन्नो न रुतसम्पन्न इत्यादि। एवं पुरुषचतुष्कमपि। पुरुषचतुष्कम्-प्रीतिं करोमीत्येकः प्रीतिं करोतीत्यादि। आत्मनः प्रीतिं करोति न परस्येत्यादि च। वृक्षचतुष्कम्-पत्र-पुष्प-फल-छायोपेतत्वात्। एवं तत्समानं पुरुषचतुष्कमपि।

भारवाहकाश्वासचतुष्टयम्–अंसान्तरे भारसङ्क्रमः, उच्चाराद्युत्सर्गः, नागकु–माराद्यायतन आवासः, यावज्जीव–मवस्थानंच।एवंश्रावकाश्वासचतुष्टयम्–प्रत्याख्यानपौषधादिप्रतिपत्तिः, सामा–यिकादिसम्यगनुपालनम्, चतुर्दश्यादौ प्रतिपूर्ण्णः पौषधः, विधिना पादपोपगमनोरीकारश्च। पुरुषचतु–ष्कमुदितोदित इत्यादि। तत्र भरत उदितोदितः, ब्रह्मदत्त उदितास्तमितः, हरिकेशबलोऽनगारोऽस्तमितोदितः, कालसौकरिकोऽस्तमितास्तमितः।

युग्मचतुष्टयम्–कृत–त्र्योज–द्वापर–कल्योजयुग्मैः। शूरचतुष्कम्क्षान्ति–तपो–दान–युद्धशूरैः। अर्हन्–मुनि–वैश्रमण–वासुदेवाश्च तत्तच्छूराः। पुष्प–चतुष्कम्–रुपसम्पन्नं न गन्धसम्पन्न–मित्यादि। एवं पुरुषचतुष्कम्–रूपस–म्पन्नो न शीलसम्पन्न इत्यादि। एवं जात्याः श्रुत–शील–चारित्रैश्चतुर्भङ्गी दृश्या। कुलस्य च बलरूपश्रुतशीलचारित्रैः। बलादेश्च।

फलचतुष्कम्–आमलकमधुरं द्राक्षा–मधुरं क्षीरमधुरं खण्डमधुरं च।

एवमाचार्यचतुष्कमपि तत्सादृश्यात् प्रशमादिगुणतारतम्यात्। पुरुषचतुष्टयम्–वैयावृत्यकरो न प्रतीच्छक इत्यादि। पुरुषचतुष्कम्–गणशोभकरो न मानकर इत्यादि। पुरुषचतुष्कम्–रूपत्यागी (साधुनेपथ्यस्य पुष्टालम्बने त्यागकर्ता) न धर्मत्यागीत्यादि। धर्मत्यागी गणस्थितेरत्यागी–त्यादि च। प्रियधर्मा न दृढधर्मेत्यादि च।

श्रावकचतुष्टयम्–मातापितृ–भ्रातृ–मित्र–सपत्नीसमानत्वात्। आदर्श–

पताका-स्थाणु-खरकण्टकसादृ-श्याद्वा। देवानागमने तुर्यो हेतुः-प्रतिकूलत्वान्मानुष्यगन्धस्य। तदागमने तुर्योहेतुः-मित्रादिसङ्केतः।लोकान्धकारे तुर्यो हेतुः-अग्निव्युच्छेदः। लोकोद्योते तुर्यो हेतुः-अर्हत्परिनिर्वाणमहिमा।

दुःखशय्याचतुष्टयम्-जिनप्रवचनशङ्कादि, परलाभाऽऽकाङ्क्षादि, दिव्यकामभोगाऽऽकाङ्क्षादि, गृहिपर्यायानुभूतसम्बाधनपरिमर्द्दनादिस्मृतिस्तदाशा च।

सुखशय्याचतुष्कमेतद्वैपरीत्यात्, तुर्यायां विशेषोऽर्हदालम्बनेन तितिक्षाभिलाषः। अवाचीनयचतुष्कम् - अविनीत-विकृतिप्रतिबद्ध-अनुपशान्तक्रोध-मायिभिः। इतरदेतद्वैपरीत्यात्।

पुरुषचतुष्कम्-परिज्ञातकर्मा न तु परिज्ञातसञ्ज्ञ इत्यादि। ह्रीसत्त्वो ह्रीमनः सत्त्वश्चलसत्त्वः स्थिरसत्त्व इति वा। शय्यादिप्रतिमाचतुष्कमाचारप्रसिद्धम्। तुल्यप्रदेशाः-धर्मास्तिकायोऽधर्मा-स्तिकायो लोकाकाश एकजीवश्च।

स्पृष्टवेदकेन्द्रियचतुष्कम् – चक्षुर्वर्जम्। जीवपुद्गलानामलोकगतिविरहहेतवः – गत्यभावः, निरुपग्रहता, ऋक्षत्वम्, लोकानुभावश्च।

चतुर्धा सङ्ख्यानम् – प्रतिकर्म, व्यवहारः, क्षेत्रगणितम्, राशिश्च। अधोलोकान्धकारहेतवः – नरका नैरयिका पापकर्माण्यशुभपुद्गलाश्च। तिर्यग्लोकोद्योतहेतव – चन्द्राः सूर्या मण्योऽग्निश्च। ऊर्ध्वलोकोद्योतहेतवः – देवा देव्यो विमाना आभरणाः।

॥४-४॥

नैरयिकाहारश्चतुर्धा–अङ्गारमुर्मुरशी–तलहिमशीतलत्वात्। तिर्यगाहारः–कङ्क–बिल–पाणमांस–पुत्रमांसो–पमाभिः। कङ्कपक्षिणो दुर्जरोऽपि सुखपरिणामः। बिलप्रवेशवद्यस्य रसो न वेद्यते स बिलोपमः। पाणो मातङ्गः, जुगुप्स्यत्वादिना दुःखाद्यं तन्मांसम्, दुःखाद्यतरं च पुत्रमांसम्। मनुष्याहारोऽ–शनादि। देवाहारो वर्णादिमत्तया।

जातिआशीविषाः–वृश्चिकमण्डूको–

रगनराः। अर्धभरत-भरत-जम्बूद्वीप-समयक्षेत्रप्रमाणशरीराणि यथाक्रमं विषव्याप्तं कर्तुमेषां शक्तिः। व्याधिचतुष्कम्-वात-पित्त-कफ-सन्निपातोद्भवम्।

मेघचतुष्कम्-गर्जिता न वर्षित त्यादि। एवं पुरुषा अपि। यद्वा कालवर्षी नाकालवर्षीत्यादि। यद्वा क्षेत्रवर्षी नाक्षेत्रवर्षीत्यादि। एवं पुरुषा अपि। यद्वा जनयिता (धान्याद्युद्गमयिता) न तु निर्म्मापयिता (सफलताजनकः) इत्यादि। एवं मातापितृचतुष्कमाचार्य-

चतुष्कं च। मेघचतुष्टयम्–पुष्कल–संवर्त्तकः–एकवृष्ट्या दशवर्षसहस्त्राणि भावयति। प्रद्युम्नो दशवर्षशतानि। जीमूतो दशवर्षाणि। जिह्मस्तु बहुभिर्वर्षणैरकमेवाब्दं यावद् भावयति (धान्यादिनिष्पादनसमर्थां करोति), न वा भावयति, ऋक्षत्वात्तज्जलस्य। एवं सूरिणां दानिनामपि चतुष्कम्।

करण्डकचतुष्कम्–श्वपाक–वेश्या–गाथापति–राजसत्कम्। एवमाचार्या अपि। गोलकचतुष्कम्–मदन–जतु–काष्ठ–मृत्तिकानिष्पन्नम्। यथैषां काठि–

न्यतारतम्यम्, एवं पुरुषचतुष्कस्यापि परीषहसहनं प्रति। यद्वाऽयः–त्रपु–ताम्र–सीसकनिष्पन्ना गोलाः। तद्वच्च कर्मगुरवः पुरुषाः। यद्वा हिरण्य–सुवर्ण–रत्न–वज्रमया गोलाः। तद्वच्च ज्ञानादिगुणाधिकाः पुरुषाः।

पत्रचतुष्कम्–असिपत्रं करपत्रं क्षुरपत्रं कलम्बचीरिकापत्रम् (शस्त्रविशेषः)। एवं पुरुषाः स्नेहपाशच्छेदसामर्थ्यं प्रतीत्य। आद्यः सनत्कुमारः, द्वितीयः तथाविधश्रावको यः पुनः पुनरुच्यमानो भावनाभ्यासात् स्नेहतरुं छिनत्ति,

तृतीयो देशविरतः, तुर्येऽविरतसद्दृष्टिः। पुरुषचतुष्कम्–सिंहतया निष्क्रान्तः सिंहतया विहरति। सिंहतया निष्क्रान्तः शृगालतया विहरतीत्यादि।

कटचतुष्कम्–शुम्ब (तृणविशेष)– वंशशकल–चर्म–कम्बलकटरूपम्। एवं गुर्वादिप्रतिबन्धोऽपि। चतुष्पद– चतुष्कम्–एकखुर–द्विखुर–गण्डीपद– सनखपदाः। चारित्रापध्वंसचतुष्कम्– आसुर आभियोगः सम्मोहो दैव– किल्बिषश्च। तत्तद्भावनाजनितेनात्र वेद्यं तत्तत्त्वम्।

आसुरत्वकर्मबन्धहेतुवः–क्रोधशीलता, कलहशीलता, आहारादिसंसक्ततपः, निमित्ताजीवनम्। आभियोगत्वाश्रवाः– आत्मोत्कर्षः, परपरिवादः, भूतिकर्म, कौतुककरणम्। सम्मोहत्वाश्रवाः– उन्मार्गदेशना मार्गान्तरायः कामाशंस– प्रयोगो लोभनिदानकरणं च। दैव– किल्बिषिकत्वाश्रवः–अर्हत्तदुक्तधर्मा– चार्यादिसङ्घानामवर्णवादः।

प्रव्रज्याचतुष्कम्–नटखादिता। (धर्म– कथाकरणोपार्जितभोजनस्य), भट

खादिता (बलोपदर्शनलब्धभोजनस्य), सिंहखादिता (यथारब्धभक्षकस्य), शृगालखादिता (न्यग्वृत्त्युपात्तभक्षकः)।

सञ्ज्ञाचतुष्कम्–आहारादि। आहारसञ्ज्ञोत्पादहेतवः–अवमकोष्ठता, क्षद्वेदनीयोदयः, तच्छ्रवणजनिताभिलाषः, तदर्थोपयोगश्च। भयसञ्ज्ञोदयहेतवः–हीनसत्त्वता, भयवेदनीयकर्मोदयः, भीषणदर्शनादिजनितबुद्धिः, तदर्थोपयोगश्च। मैथुनसञ्ज्ञोदयनिबन्धनानि–चितमांसशोणितता, मोहनीयोदयः, तत्कथाश्रवणादिप्रसूतमतिः, तदर्थो–

पयोगश्च। परिग्रहसञ्ज्ञोत्पादहेतवः-अविमुक्तता, लोभवेदनीयकर्मोदयः, परिग्रहदर्शनादिजनितबुद्धिः, तदर्थोपयोगश्च।

कामचतुष्कम्-देवानां शृङ्गाराः, मनुजानां करुणाः, तिरश्चां बीभत्साः, नैरयिकाणां रौद्राः। कुम्भचतुष्कम्-भिन्न-जर्जरित-परिस्त्रावि-अपरिस्त्राविस्त्पम्। एवं चारित्रचतुष्कमपि। कुम्भचतुष्कम्-मधुकुम्भो मधुपिधानः, मधुकुम्भो विषपिधान इत्यादि। एवं पुरुषचतुष्कमपि-निर्मलहृदयजिह्वाभ्यां

मधुकुम्भो मधुपिधान इत्यादि।

उपसर्गचतुष्कम् – दिव्य – मानुष – तिर्यङ्योनिक – आत्मसञ्चेतनीय (वातादि) रूपम्। प्रत्येकस्याप्यस्य हेतु–चतुष्कं यथागमं ज्ञेयम्। कर्मचतुष्कम्–प्रकृत्यादि। सङ्घचातुर्विध्यम्–साध्वादिभिः। बुद्धिचतुष्कम्–औत्प–त्तिक्यादि। मतिचतुष्कम्–अवग्रहादि। यद्वोदककुम्भोदकसमाना–नदीपुलिन–गर्त्तोदकसमाना सरउदकसमाना समु–द्रोदकसमाना च। अधिकाधिकावगा–हधारण–सामर्थ्यात्।

विद्यमानगुणनाशहेतवः–क्रोधः, प्रतिनिषेवणम्, अकृतज्ञता, मिथ्यात्वाभिनिवेशः। विद्यमानगुणदीपनहेतवः–अभ्यासः परानुवर्त्तना कार्यानुकूल्यं कृतप्रतिकृतिश्च।

धर्मद्वारचतुष्कम्–क्षान्तिर्मुक्तिरार्जवं मार्दवं च। नैरयिकताहेतुकर्माश्रवाः–महारम्भो महापरिग्रहः पञ्चेन्द्रियवधः कुणिमाहारश्च। तिर्यक्ताहेतवः–माया निकृतिर्मृषावादः कूटतुलादि। मानुष्यनिबन्धनानि–प्रकृतिभद्रकता प्रकृतिविनीतता सानुक्रोशताऽमात्सर्यं च।

देवत्वहेतवः—सरागसंयमः संयमासंयमः बालतपोऽकामनिर्जरा च।

सनत्कुमारमाहेन्द्रयोश्चतुर्वर्णानि विमानानि—नील—लोहित—हारिद्र—शुक्लानि। महाशुक्रसहस्त्रारयोर्दे—होच्छ्रयः—हस्तचतुष्कम्। स्त्रीगर्भचतुष्कम्—स्त्री—पुरुष—नपुंसक—बिम्बरूपम्। गर्भाकृतिरावर्त्तवपरिणामो बिम्बम्। काव्यचतुष्कम्—गद्य—पद्य—कथ्य—गेयरूपम्। प्रत्येकरसाब्धयः—लवणोदो वरुणोदः क्षीरोदो घृतोदश्च। आवर्त्तचतुष्कम्-

खरावर्त्तः समुद्रादेश्चक्रविशेषाणां वा, तत्समः क्रोधः। उन्नतावर्त्तः पर्वतारोहणमार्गस्य वातोत्कलिकाया वा, तत्समो मानः। गूढावर्त्तो गेन्दुकदवरकस्य दारुर्ग्रन्थ्यादेर्वा, तत्समा माया। आमिषावर्त्तः शकुनिकादेर्मांसाद्यर्थमावर्त्तः, तदुपमश्च लोभः। तत्सादृश्यं च क्रमशः परापकारकरणदारुणत्वात्, पत्रतृणादिवस्तुन इव मनस उन्नतत्वारोपणात्, अत्यन्तदुर्लक्ष्यस्वरूपत्वात्, अनर्थ-शतसम्पातसङ्कुलेऽप्यवपतनकारणत्वाच्च।

# पञ्चस्थानकम्

॥५-१॥

महाव्रतानामणुव्रतानां च पञ्चकम्। कृष्णादि वर्णपञ्चकम्। तिक्तादि रसपञ्चकम्। शब्दादि कामगुण-पञ्चकम्। जीवरागादिहेतुपञ्चकम-प्येतदेव। दुर्गतिहेतवः-प्राणातिपा-तादयः। सद्गतिहेतवः-तद्विरतयः। प्रतिमापञ्चकम्-भद्रा सुभद्रा महाभद्रा सर्वतोभद्रा भद्रोत्तरा। पञ्चस्थावरकायाः-इन्द्रः, ब्रह्म,

शिल्पः, सम्मतिः, प्राजापत्यश्च, पृथिव्यादीनां तद्व्यपदेशस्तत्स्वामि-कत्वात्तेषाम्।

समुत्पद्यमानस्यावधिदर्शनस्य क्षोभः- (१) अल्पभूतां पृथ्वीं दृष्ट्वा (२) कु-न्थुराशित्वप्राप्तां पृथ्वीं दृष्ट्वा (३) महोरगं दृष्ट्वा (४) महर्द्धिकदेवं दृष्ट्वा (५) ग्रामादावुच्छिन्नस्वामिकानि महा-निधानानि दृष्ट्वा। नैवं क्षोभः समुत्प-द्यमानकेवलज्ञानदर्शनयोर्भवति।

नैरयिकशरीराणि-पञ्चवर्णानि पञ्चर-

सानि च। एवं यावद्वैमानिकशरीराणि। शरीरपञ्चकम्–औदारिकादि। सर्वेऽपि बादरशरीराणि पञ्चवर्णानि पञ्चरसानि द्विगन्धान्यष्टस्पर्शानि।

पुरिमपश्चिमानां जिनानां स्थानपञ्च-कैर्दुर्गमं भवति–दुराख्येयं दुर्विभं दुर्दर्शं दुस्तितिक्षं दुरनुचरं च। तद्विनेयानां वस्तुतत्त्वं कृच्छ्राख्येयं भवतीत्याद्य-र्थोऽत्रोह्यः। मध्यमजिनानां तु सुगमम्, स्वाख्येयादित्वात्।

श्रीवीरेण नित्यं वर्णितानि पञ्च

स्थानानि—क्षान्तिर्मुक्तिरार्जवं मार्दवं लाघवम्। तथा सत्यं संयमस्तपस्त्यागो ब्रह्मचर्यवासः। तथोत्क्षिप्तचरको निक्षिप्तचरको रूक्षचरकश्च। तथाऽज्ञातचरकोऽन्नग्लानको (दोषान्नभुक्) मौनचरकः संसृष्टकल्पिकस्तज्जातसंसृष्टकल्पिकश्च। तथौपनिधिकः (प्रत्यासन्नेन यथाकथञ्चिदानीतेन चरति) शुद्धैषणिकः सङ्ख्यादत्तिको दृष्टलाभिकः पृष्टलाभिकश्च। तथाऽऽचाम्लिको निर्व्विकृतिकः पुरिमार्द्धिकः परिमितपिण्डपातिको भिन्नपिण्डपातिकः।

तथाऽरसाहारो विरसाहारोऽ-न्ताहारः प्रान्ताहारो रूक्षाहारश्च। अरसेन जीवितुं शीलमाजन्मापि यस्य स एवमाद्य र्थकाऽ रसजीवीत्यादयोऽप्यूह्याः।

तथा स्थानातिगः (अतिमात्रकायोत्स-र्गादिकृत्) उत्कटुकासनिकः प्रतिमा-स्थायी वीरासनिको नैषद्यिकश्च। तथा दण्डायतिको लगण्डशाय्यातापकोऽ-प्रावृतकोऽकण्डूयकश्च। महानिर्जराहे-तवः-अग्लान्याऽऽचार्योपाध्यायस्थ-विर-तपस्विग्लानवैयावृत्यानि,

शैक्षकुलगणसङ्घसा-धर्मिकवैया-
वृत्यानि च।

विसम्भोगालम्बनानि-अकृत्यप्रति-
षेवा, प्रतिषेव्यानालोचनम्, आलो-
च्याप्रस्थापनम्, प्रस्थाप्यानिर्विशनम्,
स्थविरसामाचार्यतिक्रमः स्थविरा
मे किं करिष्यन्तीत्यवज्ञा च।
पाराञ्चितकरणपुष्टालम्बनानि-कुल-
भेदोद्यमः, गणभेदोद्यमः, हिंसाप्रेक्षणम्,
छिद्रप्रेक्षणम्, पुनः पुनस्सुष्टमदिप्रश्न-
प्रयोगश्च।

आचार्यादेर्गणे पञ्च व्युद्ग्रहस्था-नानि-आचार्यादिना गण आज्ञादेः सम्यगप्रयोगः, यथारात्निकं वन्दना-प्रयोजनम्, सूत्रादेर्यथावसरमविनियोगः, ग्लानशैक्षवैयावृत्त्यानुद्यमः, गणानापृ-च्छ्यचारिता। एतद्वैपरीत्यादव्युद्ग्रह-स्थान-पञ्चकम्।

निषद्यापञ्चकम्-उत्कुटुका गोदोहिका। समपादपुता पर्यङ्काऽर्द्धपर्यङ्का च। आर्जवस्थानपञ्चकम्-साध्वार्जवं साधुमार्दवं साधुलाघवं साधुक्षान्तिः साधुमुक्तिः। पञ्च ज्योतिष्काः-

सूर्यादयः। देवपञ्चकम्–भव्यद्रव्यदेवा नरदेवा धर्मदेवा देवाधिदेवा। भावदेवाः। परिचारणाः–काय–स्पर्श–रूप–शब्द–मनःपरिचारणैः। प्रतिघातानि–गति–स्थिति–बन्धन–भोग–बलादि–प्रतिघातानि। आजीवकाः–जाति–कुल–कर्म–शिल्प–लिङ्गाजीवकाः। राजचिह्नानि–खड्गं छत्रं शेखरक उपानहौ चामरं च।

छद्मस्थस्य परीषहादिसहनालम्बनानि–(१) उदीर्णकर्म्मतयोन्मत्तकोऽयं पुरुषः कुरुत आक्रोशादीनि (२) यक्षावि–

ष्टोऽयं कुरुत आक्रोशादीनि (३) मत्क-
र्मोदयेनाऽयं कुरुत आक्रोशादीनि
(४) तत्सम्यगसहमानस्य ममैकान्त-
पापकर्मबन्धः (५) तत्सम्यक्सहमानस्य
ममैकान्तनिर्जरा। केवलिनस्तु तदाल-
म्बनानि (१) क्षिप्तचित्तोऽयं पुरुषः०
(२) दीप्तचित्तोऽयं पुरुषः० (३) यक्षा-
विष्टोऽयं०।मत्कर्मोदयेनायं० (५)मत्कृ-
तसम्यक्सहनं दृष्टवा बहवोऽन्ये
छद्मस्थाः श्रमणा उदीर्णपरीषहादि
सम्यक् सहिष्यन्तीति। केवलिनः
पञ्चानुत्तराणि-अनुत्तरं ज्ञानं दशनं

चारित्रं तपो वीर्यं च।

॥८-२॥

वर्षावासेऽन्यग्रामगमनहेतवः–ज्ञानं दर्शनं चारित्रं स्वाचार्यादिमृतिराचार्यादिवैयावृत्यं चेति। आश्रवपञ्चकम्–मिथ्यात्वाविरतिप्रमादकषाययोगाः। एतदितरत्तु संवरपञ्चकम्। दण्डपञ्चकम्–अर्थानर्थ–हिंसाकस्माद्दृष्टिविपर्यासदण्डैः।कायिक्यादयः पञ्चविंशतिः क्रियाः। परिज्ञापञ्चकम्–उपधि–उपाश्रय–कषाय–योग–भक्तपानपरि–

ज्ञाभिः। व्यवहारपञ्चकम्–आगम–श्रुत–आज्ञा–धारणा–जीतैः। सुप्तश्रमणानां जागरपञ्चकम्–शब्दा यावत् स्पर्शाः। जागरश्रमणानां सुप्तपञ्चकमप्येतदेव। उपघातपञ्चकम्–उद्गम–उत्पादन–एषणा–परिकर्म (वस्त्रादिछेदनादि)–परिहरणा (एकाकिसाधूपकरणासेवा) चोपघातोत्तराः। एतदेव विशुद्ध्युत्तरं तत्पञ्चकम्।

दुर्लभबोधित्वहेतवः–अर्हत्–तदुक्त–धर्म–आचार्यो–पाध्याय–चातुर्वर्ण–सङ्घ–विपक्वतपोब्रह्मचर्यदेवावर्ण–

वादाः। एतद्विपर्यासात् सुलभबोधिहेत-
वोऽपि। आचारपञ्चकम्-ज्ञानाचा-
रादि। सुप्तविबोधहेतवः-शब्दःस्पर्शो
बुभुक्षा निद्राक्षयः स्वप्नदर्शनश्च।

॥५-३॥

अस्तिकायाः-धर्मास्तिकायादयः।
मुण्डापञ्चकम्-श्रोत्रेन्द्रियमुण्डादि।
यद्वा क्रोधादिमुण्डाः क्षुरमुण्डश्च। अचि-
त्तवायुपञ्चकम्-आक्रान्तो धातः
पीडितः (जलार्द्रवस्त्रे निपीड्यमाने)
शरीरानुगतः सम्मूर्च्छिमश्च (व्यजनादि-

जन्यः)। निर्ग्रन्थाः-पुलाक-बकुश-कुशील-निर्ग्रन्थ-स्नातकाः। प्रत्येकमप्येषां पञ्चकमूह्यं यथागमम्।

कल्प्यवस्त्राणि-त्रसावयवनिष्पन्नं कम्बलादि, अतसीमयम्, सन सूत्रमयम्, काप्पार्सिकम्, वृक्षत्वङ्मयं च। कल्प्यरजोहरणानि-और्णिकम्, औष्ट्रिकम्, सानकम्, बल्ववजतृणकुट्टितत्वङ्मयम्, शरपर्णीकुट्टितत्वङ्मयं च। धर्मचरस्य निश्रास्थानानि-षट्काया गणो राजा शय्यातरः शरीरं च। निधयः-

पुत्र–मित्र–शिल्प–धन–धान्यनिधयः। शौचानि–पृथ्वी–अप्–तेजो–मन्त्र–ब्रह्मशौचानि। तेजसाऽग्निना तद्वि–कारेण वा भस्मना शौचं तेजःशौचम्। ब्रह्मचर्यादिकुशलानुष्ठानम्।

छद्मस्थः सर्वभावेन पञ्च स्थानानि न जानाति न पश्यति–धर्माधर्मा–काशास्तिकायान्, अशरीरप्रतिबद्धं जीवम्, परमाणुपुद्गलं च। पञ्चमहा–नरका अनुत्तराः–कालो महाकालो रोरुको महारोरुकोऽप्रतिष्ठानश्च। महा–

विमानानि चानुत्तराणि–विजयो वैज–यन्तो जयन्तोऽपराजितः सर्वार्थसिद्धश्च। वनीपकाः–अतिथि–कृपण–ब्राह्मण–श्व–श्रमणवनीपकाः।

अचेलप्राशस्त्यहेतवः–अल्पा प्रति–लेखना, लाघविकम्, वैश्वासिकं नेपथ्यम्, अनुज्ञातं तपः, विपुल इन्द्रियनिग्रहः। उत्कटाः–दण्ड–राज्य–स्तेन–देश–सर्वोत्कटाः। निर्याणमार्गाः–पादाभ्यामुरुभ्यामुरसा शिरसा सर्वाङ्गैश्च। नरकगामित्वादि चात्र

बोध्यं यथाक्रमम्। ज्ञानपञ्चकम्-आभिनिबोधिकादि। एवं ज्ञानावरणीयपञ्चकमपि। स्वाध्यायाः वाचनादयः। प्रत्याख्यानानि-श्रद्धानशुद्धं विनयशुद्धमनुभाषणाशुद्धमनुपालनाशुद्धं भावशुद्धं च। प्रतिक्रमणानि-आश्रवद्वार-मिथ्यात्व-कषाय-योग-भाव-प्रतिक्रमणानि।

सूत्रवाचनाहेतवः-सङ्ग्रहार्थम्, उपग्रहार्थम्, निर्जरार्थम्, सूत्रं मे स्फुटं भविष्यतीति, सूत्राव्युच्छित्त्यर्थम्। सूत्र-

शिक्षणहेतवः। ज्ञान-दर्शन-चारित्रार्थम्, व्युद्ग्रहविमोक्षार्थम्, यथार्थभावज्ञानार्थं च। सौधर्मेशानायोर्विमानानि पञ्चवर्णानि कृष्णादीनि।

## षट्स्थानकम्

गुणषट्कोपेतो गणिपदयोग्यः-श्रद्धा, सत्यम्, बहुश्रुतत्वम्, शक्तिः, निर्विग्रहत्वं च। षष्ठं यं न जानाति छद्मस्थः-शब्दम्। अशक्यषट्कं सर्वजीवानाम्-जीवमजीवं कर्तुम्, अजीवं जीवं कर्तुम्, एकसमये द्वे भाषे भाषितुम्, इच्छावशेन स्वकृतं कर्म वेदयितुम्,

परमाणु–पुद्गलछेदादि, लोकान्ताद् बहिर्गन्तुम्। जीवनिकायाः पृथ्वी–कायिकादयः। तारकाकारा ग्रहाः–
–शुक्रो बुधो गुरुर्मङ्गलः शनिः केतुश्च।
सर्वजीवानामसुलभानि–मनुष्यभवः, आर्यक्षेत्रम्, सुकुलम्, केवल्युक्तधर्म–श्रवणम्, तच्छ्रद्धानम्, तदनुष्ठानं चेति।
संहननानि–वज्रर्ष–भनाराचादीनि।
संस्थानानि–समचतु–रंसादीनि।
अनात्मवतोऽहितानिपर्यायः, परिवारः, श्रुतम्, तपः, लाभः, पूजासत्कारश्च।
एतान्येव हितान्या–त्मवतः। दिक्ष–

ट्कम्–प्राचीनादिकम्। आभिरेव दिग्भिर्जीवानां गत्यादिप्रवृत्तिः। आहारग्रासपुष्टालम्बनानिवेदना वैयावृत्यमीर्याशुद्धिः संयमः प्राणवृत्तिर्धर्मचिन्ता च। आहारव्यवच्छेदपुष्टालम्बनानि–रोग उपसर्गो ब्रह्मपालनं प्राणिदया तपः शरीरत्यागश्च।

उन्मादहेतवः अर्हत्तदुक्तधर्माचार्योपाध्यायचातुर्वर्णसङ्घावर्णवादा यक्षावेशो मोहनीयोदयश्च। प्रमादाः–मद्य–निद्रा–विषय–कषाय–द्यूत–प्रतिलेखनाप्रमादाः। प्रमादप्रत्युपेक्षा–आरभटा

सम्मर्द्दा मोसली प्रस्फोटना विक्षिप्ता वेदिका च। अप्रमादाप्रत्युपेक्षणम्–अनर्त्तितमवलितमननुबन्ध्यमोसलि षट् पुरिमा नव खोटकाः पाणेः प्राणानां प्रमार्जना च। लेश्याः–कृष्णादयः।

अवग्रहमतयः–क्षिप्र–बहु–बहुविध–ध्रुवा–ऽ–निश्रिताः। एवमीहामतयोऽपि, नवरमन्त्याऽ–सन्दिग्धा। एवमपायमतयः। धारणामतयस्तु–बहु धारयति, बहुविधं धारयति, पुराणं धारयति, दुर्धरं धारयति, अनिश्रितं धारयति, असन्दिग्धं धारयति। बाह्यतपः–अनशनादि।

आभ्यन्तरतपः–प्रायश्चित्तादि।

विवादरीतयः–अपसृत्य (अवसर-लाभाय कालहरणं कृत्वा), उत्सृत्य (लब्धावसरतयोत्सुकीभूय), (अध्यक्षादीन्) अनुलोमान् कृत्वा, प्रतिलोमान् कृत्वा, भक्त्वा (संसेव्य), (स्वपक्षपातिभिः) मिश्रान् कृत्वा च। अवाच्यानि–अलीकम्, हीलितम्, खिंसितम्, परुषम्, अगारस्थितम्, उपशान्तकषायोदीरकं च। परिमन्थवः (घातकाः)–कौकुचिकः संयमस्य, मौखरिकः सत्यवचनस्य, चक्षुर्लोल

ईर्यापथिक्याः, तिन्तिणिक एषणागो-चरस्य, इच्छालोभिको मुक्तिमार्गस्य, लोभनिदानकरणं मोक्षमार्गस्य। सर्वत्र भगवताऽनिदानतैव प्रशंसिता। भोजन-परिणामः षड्विधः-मनोज्ञो रसिकः प्रीणनीयो बृंहणीयो दीपनीयो दर्पणीयश्च। षड्विधो विषपरिणामः--दष्टं भुक्तं निपतितं मांसानुसारि शोणितानुसारि अस्थिमिञ्जानुसारि च। चमरचञ्चाराजधान्यामुपपात-विरहकालः षणमासाः। एवं सप्तम-पृथिव्यामपि। प्रत्येकेन्द्रस्थानेऽपि। सिद्धिगतावपि।

देव-नैरयिका-ऽसङ्ख्येयवर्षायुस्ति-र्यङ्मनुष्याणामायुर्बन्धः षणमासावशेष आयुषि। षड्विधो भावः-औदयिक औपशमिकः क्षायिकः क्षायोपशमिकः पारिणामिकःसान्निपातिकश्च।षड्विध-प्रतिक्रमणानि-उच्चार-प्रस्त्रवण-इत्वर-यावज्जीविक-यत्किञ्चिन्मि-थ्या-स्वापनान्तितकानि।

## सप्तस्थानकम्

सप्तविधं गणापक्रमणम्- (१) सर्व-धर्मान् रोचयामि। (२) एककान्

रोचयामि, एककान् तु न रोचयामि। (३) सर्वधर्मान् विचिकित्सामि, (४) एककान् विचिकित्सामि, एककांस्तु न विचिकित्सामि। (५) सर्वधर्मानन्येभ्यो ददामि। (६) एककान् ददाम्येककांस्तु न। (७) इच्छामि भदन्त! एकाकिविहारप्रतिमामुपसम्पद्य विहर्तुम्।

सप्तविधं विभङ्गज्ञानम्- (१) एकदिग्लोकाभिगमम् (२) पञ्चदिग्लोकाभिगमम् (३) बाह्याभ्यन्तरपुद्गलरचितशरीरो जीव इत्यवष्टम्भवत् (४)

अबाह्याभ्यन्तर पुद्गलरचितशरीरो जीव इत्यवष्टम्मवत् (५) क्रियावरणो जीव इत्यवष्टम्भपरम् (६) रूपी जीव इत्यवष्टम्भपरम् (७) सर्वमिदं जीवा इत्यवष्टम्भपरम्।

पिण्डैषणाः पानैषणा अवग्रहप्रतिमा सप्तमिका महाध्ययनानि (सूत्रकृताङ्ग-द्वितीयश्रुतस्कन्धसत्कानि) च सप्त। अधोलोके पृथ्व्यो घनोदधयो घनवातास्तनुवाता अवकाशान्तराणि च सप्त। संस्थानानि-दीर्घ-ह्रस्व-वृत्त-त्र्यंस-चतुरंस-पृथुक-परिमण्डलानि।

भयस्थानानि–इहलोक–परलोक–आदान–अकस्मात्–वेदना–मरण–अपयशोभयानि।

छद्मस्थलक्ष्म– (१) हिंसा (२) असत्यभाषणम् (३) अदत्तादानम् (४) शब्दाद्यास्वादनम् (५) स्वपूजाद्यनुमोदना (६) इदं सावद्यमिति प्रज्ञाप्य प्रतिसेवनम् (७) यथावचोऽनुष्ठानविरहः। केवलिलक्ष्मैतद्विपर्यासात्।

मूलगोत्राणि–काश्यप–गौतम–वत्स–कुत्स–कौशिक–मण्डव–वाशिष्ठानि।
मूलनयाः–नैगमादयः। स्वराः–षड्ज–

ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादाः। प्राणिविशेषस्वरः बोध्यो यथागमम्, स्वरमण्डलं च। सप्तविधः कायक्लेशः-कार्योत्सर्गकारी, उत्कटुकासनिकः, प्रतिमास्थायी, वीरासनिकः, नैषद्यिकः, दण्डायतिकः, लगण्डशायी च। जम्बूद्वीपे वर्षाः-भरतक्षेत्रादयः। वर्षधरपर्वताः-लघुहिमवदादयः। नद्यः-गङ्गादयः पूर्वाभिमुखाः। सिन्ध्वादयः पश्चिमाभिमुखाः। कुलकरसप्तकम्-विमलवाहनादि। दण्डनीतिसप्तकम्-हाकारः, माकारः,

धिक्कारः, परिभाषा (कोपवचः), मण्ड-लबन्धः (इङ्गितक्षेत्रबहिर्गमन-निषेधवचः), चारकः, छविच्छेदश्च (हस्तादिछेदः) चक्रिण एकेन्द्रियरत्नानि-चक्र-छत्र-चर्म-दण्ड-असि-मणि-काकिणीरूपाणि। पञ्चेन्द्रियरत्नानि-सेनापति(कोष्ठागारनियुक्तः)-गृहपति (सूत्रधाररूपः)-वर्द्धकी-पुरोहित-स्त्री-अश्व-हस्तिरूपाणि।

सप्तभिः स्थानैर्जानीयादवगाढो दुःष-मेति-अकालवृष्टिः,कालवृष्टिः,असा-धुपूजा, साध्वपूजा, गुरुणा मिथ्या-

विप्रंतिपत्तिः मनोदुःखिता, वचोदुः खिता च। एतद्विपरीतं सुषमलक्ष्म।

सप्तविध आयुर्भेदः- अध्यवसान-निमित्त(शस्त्रादि)-आहार-वेदना-पराघात-स्पर्श-उच्छ्वासनिःश्वासाः। सप्तविधं दर्शनम्-सम्यङ्-मिथ्या-मिश्र-चक्षु-रचक्षु-रवधि-केवल-दर्शनैः। सप्तमः छद्मस्थाज्ञेयः-गन्धः। विकथाः-स्त्र्यादयो मृदुकारुणिकी। दर्शनभेदिनी चरित्रभेदिनी च। सप्तविधोऽसंयमः-पृथ्वीकायासंयमो यावदजीवकायासंयमः। एवमारम्भा-

दयोऽपि। सप्त श्रेण्यः–ऋज्वायता, एकतो वक्रा, उभयतो वक्रा, एकदिश्यङ्कुशाकारा, उभयतोऽङ्कु–शाकारा, चक्रवाला, अर्धचक्रवाला च। चमरेन्द्रानीकाः सप्त–पादा–तानीकम्, अश्वानीकम्, कुञ्जरानीकम्, महिषानीकम्, रथानीकम्, नाट्या–नीकम्, गन्धर्वानीकं च। एवमन्येषामपि द्रष्टव्यान्यनीकानि।

वचनविकल्पाः–आलापोऽनालाप उल्लापोऽनुल्लापः संलापः प्रलापो विप्रलापश्च। विनयाः–ज्ञान–दर्शन–

चारित्र–मनो–वचः–काय–लोकोप–चारविनयाः। एषामपि प्रत्येकं सप्तभेदा यथागममूह्या :। समुद्धाताः–वेदनादयः। श्रीवीरतीर्थे निह्नवसप्तकं तदाचार्याश्च–बहुरताः–जमालिः, जीवप्रदेशिताः–तिष्यगुप्तः, अव्यक्तिकाः–आषाढः, सामुच्छेदिकाः–अश्वमित्रः, द्वैक्रियाः–गङ्गः, त्रैराशिकाः–षडुलूकः, अबद्धिकाः–गोष्ठामाहिलः। सातवेदनीयानुभावः सप्तविधः–मनोज्ञाः शब्दादयो मनःसुखता वाक्सुखता च। एतद्विपर्यासादसात–वेदनीयानुभावः।

# अष्टस्थानकम्

अष्टसम्पन्न एकाकिविहारप्रतिमार्हः- श्रद्धावान्, सत्यः, मेधावी, बहुश्रुतः, शक्तिमान्, अल्पाधिकरणः, धृतिमान्, वीर्यसम्पन्नः। अष्टकर्मप्रकृतयः-ज्ञाना- वरणीयादयः। एकमपि मायी मायां कृत्वा नालोचयेत्, तस्य नास्त्याराधना। नित्यं चासौ शङ्कितो भीतश्च मृत्वा गच्छति दुर्गतिम्। भवति च सर्वावज्ञापात्रम्। मायिनोऽप्यालोचितप्रतिक्रान्तवतः सद्गतिः सर्वसत्कारपात्रत्वं च।

संवरा:-श्रोत्रादिसंवरा मनोवाक्कायसं-वराश्च। एवम-संवरा अपि। स्पर्शा:-कर्कशो मृदुर्गुरुर्लघु: शीत उष्णस्स्निग्धो रूक्षश्च। गणिसम्पद:-आचार-श्रुत-शरीर-वचन-वाचना-मति-प्रयोग-सङ्ग्रहपरिज्ञासम्पद:। समितय:-ईर्यासमित्यादय:।

आलोचनाप्रतीच्छार्ह:-आचारवान्, अवधारणावान्, व्यवहारवान्, अपव्री-डक:, प्रकारी (प्रकर्षेण शुद्धिं कारयति), अपरिश्रावी, निर्यापक: (तथाकरोति यथा शिष्यो निर्वाहयति प्रायश्चित्तम्),

अपायदर्शी (शिष्यचित्तभङ्गानिर्वाहाद्य-नर्थदर्शी)।

आलोचनार्हः-जाति-कुल-विनय-ज्ञान-दर्शन-चारित्रसम्पन्नः क्षान्तो दान्तः। मदस्थानानि-जाति-कुल-बल-रूप-तपः-श्रुत-लाभ-ऐश्वर्य-मदाः। महानिमित्तानि-भौम-उत्पात-स्वप्न-अन्तरिक्ष-आङ्ग-स्वर-लक्षण-व्यञ्जनरूपाणि। वचनविभक्तयः-निर्देशे प्रथमा, उपदेशने द्वितीया, करणे तृतीया, सम्प्रदाने चतुर्थी, अपादाने पञ्चमी, स्वस्वामिसम्बन्धे षष्ठी, सन्निधाने सप्तमी, आमन्त्रणे

चाष्टमीति। छद्मस्थेन सर्वभावेनाज्ञेयोऽ-दृश्यश्च वातः धर्म्मास्तिकायं जाव परमाणुपुद्गलं गन्धं वातं न जानाति छद्मस्थोऽष्टैतानि स्थानानि। अष्ट सूक्ष्माः-प्राण-पनक-बीज-हरित-पुष्प-अण्ड-लयन-स्नेहसूक्ष्माः। भरतचक्रिपुत्रपौत्रादयोऽष्टौ सिद्धाः-आदित्ययशआदयः। श्रीपार्श्वस्याष्टौगणा गणधराश्च शुभादयः। अष्टमं दर्शनम्-स्वप्न-दर्शनम्। अद्धोपमितानि-पल्योपमं सागरोपमुत्सर्पिण्यवसर्पिणी पुद्गलपरावर्त्तोऽतीताद्धाऽनागताद्धा सर्वाद्धा। श्रीवीरप्रव्राजितं राजाष्टकम्-

वीराङ्गको वीरयशाः सञ्जय एणेयकः श्रेयः शिव उदायनः शङ्खश्च। अष्टविध आहारः—मनोज्ञामनोज्ञाशनादिः। ब्रह्म-लोककल्पस्याधस्ताद्रिष्टविमानेऽष्टौ कृष्णराजयः। तदवकाशान्तरेषु लोका-न्तिकविमानान्यष्टौ। तद्देवानां सारस्व-तादीनामजघन्यानुत्कर्षतः स्थितिरष्टौ सागरोपमाणि। महापद्मोऽर्हन्नष्टौ राजानः पद्माद्यभिधेयान् प्रव्राजयिष्यति। कृष्णाग्रमहिष्याणामष्टकं प्रव्रजितमरि-ष्टनेमिजिनान्तिके पद्मावत्यादयः। अष्टभिः स्थानैः सम्यक् सङ्घटितव्यं यतितव्यं पराक्रमितव्यं नैवात्रार्थे

प्रमादनीयम्- (१) अश्रुतधर्मसम्यक्-श्रवणार्थमभ्युत्थानम् (२) श्रुतधर्माव-ग्रहोपधारणार्थमभ्युत्थानम् (३) पूर्व-कर्मणां तपसा विवेकविशो-धनार्थमभ्युत्थानम् (४) असङ्गृहीत शिष्यवर्गस्य सङ्ग्रहार्थमभ्युत्थानम् (५) शैक्षमाचारगोचरं ग्राहयितुमभ्यु-त्थानम् (६) ग्लानस्याग्लान्या वैया-वृत्यकरणार्थमभ्युत्थानम् (७) साध-र्मिकानामधिकरण उत्पन्ने माध्य-स्थ्येन तदुपशमनार्थमभ्युत्थानम्। अष्टसा-मयिकः केवलिसमुद्घातः। अष्टविधा वानमन्तराः-पिशाचादयः। तेषां चैत्य-

वृक्षाः–कलम्बादयः।

## नवस्थानकम्

ब्रह्मचर्यगुप्तयो नव। विसम्भोगपुष्टालम्बनानि–आचार्य–उपाध्याय–स्थविर–कुल–गुण–सङ्घ–ज्ञान–दर्शन–चारित्रप्रत्यनीकताः। ब्रह्मचर्यनवकम्–शस्त्रपरिज्ञादय आचारप्रथमश्रुताध्ययनानि। नव तत्त्वानि–जीवादीनि। रोगोत्पत्तिहेतवः–अत्यशनम्, अहितासनम्, अतिनिद्रा, अतिजागरितम्, उच्चारनिरोधः, प्रस्त्रवणनिरोधः, मार्गगमनम्, भोजनप्रतिकूलता, इन्द्रि–

यार्थविकोपनता (कामविकारः)। नवविधं दर्शनावरणीयम्–निद्रादि। अवसर्पिण्यां बलदेववासुदेवा नव। चक्रिनिधानानि नैसर्पादयो नव। प्रत्येको नवयोजनविष्कम्भः। शरीरे नव श्रोतांसि–श्रोत्रादीनि। नवविधं पुण्यम्–अन्न–पान–वस्त्र–लयन–शयन–मनो–वचन–काय–नमस्कारपुण्यानि।पात्रा–यान्नदानेन यस्तीर्थकरनामादिपुण्यप्र–कृतिबन्धस्तदन्नपुण्यम्, एवं सर्वत्र। पापश्रुतप्रसंङ्गाः–उत्पात–निमित्त–मन्त्र–मातङ्गविद्या–चैकित्सित–कला–वास्तु–भारतादिलौकिकश्रुत–

मिथ्याप्रवचनरूपाः। नैपुणिकाः-सङ्ख्यानम्, निमित्तम्, कायिकम्, पुराणम्, पारिहस्तिकः, परपण्डितः, वादी, भूतिकर्म्म, चिकित्सितम्। श्रीवीरस्य नव गणाः-गोदासादयः। नवकोटिपरिशुद्धा भिक्षा-हनन-पचन-क्रयणानां कृतादिभिस्त्यागात्। आयुःपरिणामा :-गति-गतिबन्धन-स्थितिबन्धन-ऊर्ध्वगौरव-अधोगौ-रव-तिर्यग्गौरव-दीर्घगौरव-ह्रस्वगौ-रवपरिणामाः। श्रीवीरतीर्थे तीर्थकृन्ना-मकर्मबन्धकाः-श्रेणिकः सुपार्श्व उदायी पोट्टिलानगारो दृढायुः शङ्खः शतकः

सुलसा रेवती च। (१) कृष्णवासुदेवः (२) रामबलदेवः (३) उदकः पेढालपुत्रः (४) पोट्टिलः (५) शतकः (६) दारुको निर्ग्रन्थः (७) सत्यकी निर्ग्रन्थीपुत्रः (८) अम्बडः परिव्राजकः (९) सुपार्श्वाऽऽर्या चागामिन्यामुत्सर्पिण्यां चातुर्यामं धर्मं प्रज्ञाप्य सेत्स्यन्ति। श्रेणिकराजा कालं कृत्वा रत्नप्रभायां सीमन्तके नरक उत्पद्य तत्र दुःसह्यवेदनां वेदयित्वागामिन्यामुत्सर्पिण्यां शतद्वारनगरे महापद्माभिधान उत्पत्स्यते प्रथमतीर्थकृत्। इत्यादि तच्चरितं यथागमं ज्ञेयम्। नोकषायाः–स्त्रीवेदादयः।

# दशस्थानकम्

दशविधा लोकस्थितिः- (१) जीवानां मृत्वा मृत्वा पुनस्तत्रैवोत्पत्तिः (२) सततं कर्मबन्धः (३) सततं मोहनीयबन्धः (४)त्रसस्थावराव्यवच्छेदः(५)लोका-लोकयोरलोकलोकत्वेनाभवनम् (७) तयोरेवान्योऽन्याप्रवेशः (८) यावति क्षेत्रे जीवास्तावत्क्षेत्रं लोकः (९) यावज् जीवादीनां गतिपर्यायस्तावलू लोकः। (१०) सर्वेष्वपि लोकान्तेषु रूक्ष-द्रव्यान्तरेण पुद्गला रूक्षाः क्रियन्ते, तत्सम्पर्केण जातरूक्षपरिणामा। जीवा

पुद्गलाश्च लोकान्ताद् बहिस्ताद् गन्तुं न शक्नुवन्ति।

दशविधः शब्दः–घोषवान्, घोषरहितः, रूक्षः, भिन्नः, जर्जरितः, दीर्घः, ह्रस्वः, पृथक्त्वः (नानातूर्यादियोगनिष्पन्नः), काकली (सूक्ष्म–कण्ठगीतध्वनिः), किङ्किणी (क्षुद्रघण्टिकास्वरः)।

अच्छिन्नपुद्गलचलनहेतवः–आह्रियमाणः, परिणम्यमानः, उच्छ्वस्यमानः, निःश्वस्यमानः, वेद्यमानः, निर्जीर्यमाणः, वैक्रियमाणः, परिचार्यमाणः, यक्षाविष्टः, वातपरिगतः।

क्रोधोत्पत्तिहेतवः–मनोज्ञशब्दाद्यप–हारः, अमनोज्ञतदुपहारश्चेति द्वयं काल–त्रयविषयीकृत्य नव, दशमं तु–अहमा–चार्यानां सम्यग् वर्त्ते, ते तु मम मिथ्या प्रतिपन्ना इति।

मानहेतवः–जात्यादिमदाः, नाग–सुवर्णानां स्वान्तिक आगमनम्, अव–धिज्ञानोत्पत्तिः। दशविधा समाधिः–प्राणातिपातविरत्यादय ईर्यासमित्या–दयश्च। इतरे चासमाधयः। दशविधा प्रव्रज्या–छन्दात्, रोषात्, परिद्यूना (दारिद्र्यात्), स्वप्नात्, प्रतिश्रुतात्,

स्मारणात्, रोगात्, अनादृतात्, देवसञ्ज्ञप्तेः, वत्सानुबन्धाच्च। श्रमण-धर्माः-क्षान्त्यादयः। वैयावृत्यम्-आचार्य-उपाध्याय-स्थविर-तपस्वि-ग्लान-शैक्ष-कुल-गण-सङ्घसाध-र्मिकसत्कम्। जीवपरिणामाः--गति-इन्द्रिय-कषाय-लेश्या-योग-उपयोग-ज्ञान-दर्शन-चारित्र-वेदसत्काः। अजीवपरिणामाः बन्धन-गति-संस्थान-भेद-वर्ण-रस-गन्ध-स्पर्श-अगुरुलघु-शब्दसत्काः।

दशविधमान्तरीक्षकमस्वाध्यायिकम्-

उल्कापातः, दिग्दाहः, गर्जितम्, विद्युत्, निर्घातः, सन्ध्याचन्द्रप्रभयोर्यौगपद्यम्, यक्षादीप्तम्, धूमिका, महिका, रजउद्घातश्च। दशविधमौदा–रिकमस्वा–ध्यायिकम्–अस्थि, मांसम्, शोणितम्, अशुचिसामन्तम्, श्मशानसामन्तम्, चन्द्रग्रहणम्, सूर्यग्रहणम्, राजादिमरणम्, राजव्युद्ग्रहः, वसतेरन्तरौदारिकं शरीरं च। दश दिशः–प्राच्यादयः। तदुत्पत्ति र्मन्दरमध्यभागस्थाष्टप्रदेशिकरुचकात्। दशदिशां नामधेयाः–ऐन्द्री, आग्नेयी, याम्या, नैऋती, वारुणी, वायव्या, सोमा, ईशाना, विमला, तमा च।

द्रव्यानुयोगो दशविधः–द्रव्यानुयोगः, मातृकानुयोगः, एकार्थिकानुयोगः, करणानुयोगः, अर्पितानर्पितः, भावि-ताभावितः, बाह्याबाह्यः, शाश्वता-शाश्वतः, तथाज्ञानम्, अतथाज्ञानं च।

दशविधोऽनन्तकः–नाम–स्थापना–द्रव्य–गणना–प्रदेश–एकतो–उभयतो–देशविस्तार–सर्वविस्तार–शाश्वतान-न्तकाः। दशविधा प्रतिसेवना–दर्प–प्रमाद–अनाभोग–आतुर–आपत्–शङ्कित–सहसाकार–भय–प्रद्वेष–विमर्श–(शैक्षादिपरीक्षा)जन्यत्वात्।

आलोचनादोषाः–आवर्ज्य, अनुमानं कृत्वा, यद् दृष्टम्, बादरम्, सूक्ष्मम्, छन्नम्, शब्दाकुलम्, बहुजनम्, अव्यक्तसकाशम्, तत्सेवि। प्रायश्चित्त–दशकम्–आलोचना–प्रतिक्रमण–तदुभय–विवेक–व्युत्सर्ग–तपः–छेद–मूल–अनवस्थाप्य–पाराञ्चिकार्हतया।

दशविधं मिथ्यात्वम्–अधर्मे धर्मसञ्ज्ञा–धर्मेऽधर्मसञ्ज्ञा, अमार्गे मार्गसञ्ज्ञा, मार्गेऽमार्गसञ्ज्ञा, अजीवेषु जीवसञ्ज्ञा, जीवेष्वजीवसञ्ज्ञा, असाधूषु साधु-सञ्ज्ञा, साधुष्वसाधुसञ्ज्ञा, अमुक्तेषु

मुक्तसञ्ज्ञा, मुक्तेष्वमुक्तसञ्ज्ञा। भवन-वासिनो देवा दशविधाः-असुरकु-मारदयः।

दशविधं सौख्यम्-आरोग्यम्, दीर्घायुः, आढ्यत्वम्, शब्दरूपे कामौ, गन्ध-रसस्पर्शा भोगाः, सन्तोषः, अस्ति (प्रयोजननिष्पत्तिः), शुभो भोगः, निष्क्रमः, ततोऽनाबाधम् (मोक्षसुखम्)। सङ्क्लेशाः-उपधि-उपाश्रय-कषाय-भक्तपान-मनो-वाक्-काय-ज्ञान-दर्शन-चारित्रसत्काविशुद्धि-रूपाः। एत एव विशुद्धिरूपाऽसङ्क्लेशाः।

दशविधं बलम्–श्रोत्रादिबलानि ज्ञाना–दिबलानि तपोवीर्यबले च। दशविधं सत्यम्–जनपद–सम्मत–स्थापना–नाम–रूप–प्रतीत्य–व्यवहार–भाव–योग–औपम्यसत्यानि।

दशविधमनृतम्–क्रोध–मान–माया–लोभ–प्रेम–द्वेष–हास्य–भय–आख्या–यिका–उपघातनिश्रितत्वात्। दशविधं सत्यासत्यम्–उत्पन्न–विगत–उभय–जीव–अजीव–उभय–अनन्त–परीत्त–काल–कालैकदेशविषयकमिश्रत्वात्।

दृष्टिवादनामधेयानि–दृष्टिवादः, हेतु–

वादः, भूतवादः, तथ्यवादः, सम्यग्वादः, धर्मवादः, भाषाविचयः, पूर्वगतः, अनुयोगगतः, सर्वप्राणभूतजीवसत्त्वसु-हावहश्चेति। दशविधं शस्त्रम्-अग्निः, विषम्, लवणम्, स्नेहः, क्षारः, अम्लम्, दुष्प्रयुक्तमनोवाक्कायाः, अविरतिभावश्च। दशविधो दोषः-तज्जात-मतिभङ्ग-प्रशास्तृ-परिहरण-स्वलक्षण-कारण-हेतु-सङ्क्रामण-निग्रहवस्तुदोषाः।

दशविधो विशेषः-वस्तु-तज्जातदोष-एकार्थिक-कारण-प्रत्युत्पन्न-दोष-

नित्य–अधिकआत्मकृत–परोपनीत–नामानः। दशविधः शुद्धवागनुयोगः––चकारः, मकारः, पिकारः, सेकारः, सायंकारः, (सत्यम्), एकत्वम्, पृथक्त्वम्, सङ्गतम्, सङ्क्रामितम्, भिन्नं च।

दानं दशविधम्–अनुकम्पा–सङ्ग्रह–भय–कारुणित–लज्जा–गौरव–अधर्म–धर्म–करिष्यति (उपकारमयमिति बुद्ध्या), कृतं (मत्प्रयोजनमनेनेति)–इत्येतान्या–श्रित्य। प्रत्याख्यानदशकम्–अनागत–अतिक्रान्त–कोटिसहित–नियन्त्रित–साकार–

अनाकार–परिमाणकृत–निरवशेष–सतके–अद्धाश्रितरूपम्।

सामाचार्यः–इच्छाकारादयः। श्रीवीरदृष्टमहास्वप्नानि–तालपिशाचपराजयादीनि। दशविधं सरागसम्यग्दर्शनम्–निसर्ग–उपदेश–आज्ञा–सूत्र–बीज–अभिगम–विस्तार–क्रिया–सङ्क्षेप–धर्मरुचिरूपम्। सञ्ज्ञादशकम्–आहार–सञ्ज्ञादि। दशविधा नैरयिकवेदना–शीत–उष्ण–क्षुत्–पिपासा–कण्डू–पारतन्त्र्य–भय–शोक–जरा–व्याधि–रूपाः।

दशादशकम्–कर्मविपाकदशो–पास–

कदशाऽन्तकृद्दशाऽनुत्तरोपपातिक-
दशाऽऽचारदशा (दशाश्रुतस्कन्धः)-
प्रश्नव्याकरणदशाबन्धदशा-द्विगृद्धि-
दशा-दीर्घदशा-सङ्क्षेपिकदशारूपम्।
सर्वासामप्यासामध्ययनदशकं यथाग-
ममवगन्तव्यम्।

आगमिष्यद्भद्रतार्थकर्मबन्धहेतवः-
अनिदानता दृष्टिसम्पन्नता योगवाहिता
क्षान्तिक्षमणताजितेन्द्रियताऽमायिताऽ-
पार्श्वस्थता सुश्रामण्यता प्रवचनवत्स-
लता प्रवचनोद्भावनता च।

दशविध आशंसाप्रयोगः–इहलोक–परलोक–उभयलोक–जीवित–मरण–काम–भोग–लाभ–पूजा–सत्काराशंसाप्रयोगाः। धर्मदशकम्–ग्राम–नगर–राष्ट्र–पाषण्ड–कुल–गण–सङ्घ–श्रुत–चारित्र–अस्तिकायधर्मरूपम्।

स्थविरदशकम्–ग्राम–नगर–राष्ट्र–प्रशास्तृ–कुल–गण–सङ्घ–जाति–श्रुत–पर्यायस्थविररूपम्। पुत्रदशकम्–आत्मज–क्षेत्रज–दत्तक–विज्ञक–ओञ्स–शोण्डीर–संवर्द्धित–उपयाचित–धर्मान्तेवासिरूपम्।

केवलिनो दशानुत्तराणि–ज्ञान–दर्शन–चारित्र–तपः–वीर्य–क्षान्ति–मुक्ति–आर्जव–मार्दव–लाघवरूपाणि। दुःष–मलक्ष्म–अकालवृष्ट्यादि प्रागुक्तम्, अमनोज्ञाः शब्दादयश्च। एतद्विपरीतं सुषमलक्ष्म। कल्पतरुदशकम्–मत्ताङ्गद–भृताङ्ग–त्रुटित–दीपाङ्ग–ज्योतिः चित्राङ्ग–चित्ररस–मण्यङ्ग–गेहाकार–वस्त्रदायिरूपम्।

वर्षशतायुषः पुरुषस्य दश दशाः–
–बाला क्रीडा मन्दा बला प्रज्ञा हायनी प्रपञ्चा प्राग्भारा मुङ्मुखी (देहमुचं

प्रत्याभिमुख्यंयस्याम्)शायनीच।दशधा तेजसा भस्मीभवनम्–(१) श्रमणादिं कश्चिदत्याशातयेत्, स च परिकुपितः सन् तेजो निसृजेत्, ततः स भस्मसात् स्यात् (२) तत्पक्षपातिदेवनिक्षिप्ततेजसा भस्मीभवेत् (३) उभयनिक्षिप्ततेजसा भस्मीभवेत् (४) श्रमणनिसृष्टतेजसि स्फोटकाः समुत्पद्येरन्, ते च स्फुटितास्तं तेजोयुतमपि भस्मीकुर्युः। (५) एवं देवनिसृष्टतेजसि स्फोटकाः समुत्पद्देश्न, ते च स्फुटितास्तं तेजोयुतमपि भस्मीकुर्युः (६) उभयनिसृष्टतेजसि स्फोटकाः

समुत्पद्येशन, ते च स्फुटितास्तं तेजोयु-तमपि भस्मीकुर्युः (७) श्रमण स्फोटकेषु लघुतरस्फोटकरूपाः पुलाः समुत्पद्येरन्, ते च स्फुटितास्तं ते जोयुतमपि भस्मीकुर्युः (८) देव. (९) उभय. (१०) कश्चित् श्रमणादिं प्रति तेजो निसृजेत्, तच्च तस्मिन्नप्रभविष्णुरुत्पतनिपतां पार्श्वतः करोति, प्रदक्षिणां ददाति, ततोऽप्युत्पत्य प्रतिनिवर्त्त्योपसर्गकृच्छरीरं प्रविश्य तेजोयुतं तच्छरीरं भस्म कुर्यात्, गोशालकतेजोलेश्यावत्।

आश्चर्यदशकम्-गर्भहरणादि। ज्ञानवृ-द्धिकरं नक्षत्रदशकम्-मृगशषीर्षादि''। मिथ्याऽस्तु दरुक्तं मम। शोधयन्तु बहुश्रुताः।

इति

कर्मारिशून्यनेत्रे (२०६८) वैक्रमेऽब्दे माघकृष्णसप्तमीदिने तपागच्छयाचार्य-देवश्रीमद्विजय-प्रेम-भुवनभानु-पद्म-हेमचन्द्रसूरिशिष्य-कल्याणबोधिसूरि-सञ्चिता तृतीयाङ्गसारसञ्चयरूपा स्थानाङ्गोपनिषद्

# *Don't miss it.*



## સુકૃત સહયોગી

# શ્રી સુભાનપુરા શ્વે. મૂર્તિ. જૈન સંઘ

સુભાનપુરા, વડોદરા.

જ્ઞાનનિધિ માંથી લાભાર્થી બનવા બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરી ભૂરી અનુમોદના

૧૨૧